CC-0. Nepal Sanskrit Academy, Kathmandu

ISSN PRINT
2594-3464

विद्ययाऽमृतमश्नुते

संस्कृतसुरभिः

SANSKRITASURABHIH

वार्षिकी अनुसन्धानात्मिका त्रैभाषिकी पत्रिका

वर्षम् १, अङ्कः १, २०७४ मार्गशीर्षः (ईशवीयाब्दः 2017)

त्रिभुवन-विश्वविद्यालयः
संस्कृतकेन्द्रीयविभागः, कीर्तिपुरम्
काष्ठमण्डपः, नेपालः

CC-0. Nepal Sanskrit Academy, Kathmandu

CC-0. Nepal Sanskrit Academy, Kathmandu

ISSN PRINT 2594-3464

संस्कृतसुरभिः

SANSKRITASURABHIH

वार्षिकी अनुसन्धानात्मिका त्रैभाषिकी पत्रिका
[AN ANUAL RESEARCH JOURNAL]

वर्षम् १ | अङ्कः १ | २०७४ मार्गशीर्षः

संस्कृतकेन्द्रीयविभागः
त्रिभुवनविश्वविद्यालयः
कीर्तिपुरम्

CC-0. Nepal Sanskrit Academy, Kathmandu

संस्कृतसुरभिः

प्रधानः सम्पादकः
प्रा.डा. नारायणप्रसाद-गौतमः

सम्पादकः
सहप्रा.डा. माधवप्रसाद उपाध्यायः

प्रबन्ध-सम्पादकः
उपप्रा. रोहिणीराजः तिमिल्सिना

सम्पादनसहयोगी
डा. सुबोधः शुक्लः

सज्जा सानुबाबु आचार्यः

प्रकाशनदिनाङ्कः २०७४ मार्गशीर्ष (November 2017)
प्रकाशकः संस्कृत-केन्द्रीय-विभागः, त्रि.वि., कीर्तिपुरम्
अन्तःसञ्जालपुटकम् http://www.tucds.com
tucdsanskrit@gmail.com
दूरभाषः ०१-४३३४२७२

मूल्यम् २०० रूप्यकाणि

अत्र प्रकाशितानां लेखानां प्रामाणिकत्वादिविषये लेखकाः स्वयमेव उत्तरदायिनो भविष्यन्ति ।

—सम्पादकाः

CC-0. Nepal Sanskrit Academy, Kathmandu

अनुक्रमणिका

सम्पादकीयम्

संस्कृतनिवहः

१. प्रपञ्चचर्चायां समाजचित्रणम् — प्रा. डा. नारायणप्रसाद-गौतमः — १
२. वेदेषु वायुविज्ञानाभिव्यञ्जकत्वम् — सहप्रा. डा. माधवप्रसाद उपाध्यायः — ७
३. आश्रयत्वविषयत्वभागिनी चितिः — उपप्रा. रोहिणीराजः तिमिल्सिना — ३०
४. संस्कृतवाचः दुन्दुभिघोषः — डा. सुबोधः शुक्लः — ३५

नेपालीनिवहः

५. बौद्ध माध्यमिक दर्शन र .... — प्रा. डा. काशीनाथ न्यौपाने — ४१
६. प्राणायामविज्ञान — सफला प्रधान — ५५
७. वेदमा पर्यावरण — सानुबाबु आचार्य — ६१
८. अष्टाङ्गयोगको अन्तरङ्ग साधन ... — कमल पौड्याल — ६७

आङ्ग्लनिवहः

9. Theoretical Issues in ... — Prof. Damodar Jnawali, Ph.D. — 75
10. Description of FIRE in Vedas — Late Janardan Ghimire — 89
11. Measurement of time in... — Ram Deo Pandit — 94
12. The Origin of Sanskrit Literature — Prabhakar Upadhyay — 103

परिशिष्टम्

१३. स्मृतिलेखः (स्मृतिशेषः उपप्रा. जनार्दनः घिमिरे) — १०८

CC-0. Nepal Sanskrit Academy, Kathmandu

सङ्गठनसूक्तम्

सं समिद्युवसे वृषन्नग्ने विश्वान्यर्य आ ।
इडस्पदे समिध्यसे स नो वसून्या भर ॥

समानो मन्त्रः समितिः समानी, समानं मनः सह चित्तमेषाम् ।
समानं मन्त्रमभिमन्त्रये वः, समानेन वो हविषा जुहोमि ॥

सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम् ।
देवा भागं यथा पूर्वे सञ्जानाना उपासते ॥

समानी व आकूतिः, समाना हृदयानि वः ।
समानमस्तु वो मनो, यथा वः सुसहासति ॥

–ऋग्वेदः १०/१९१

CC-0. Nepal Sanskrit Academy, Kathmandu

सम्पादकीयम्

ॐ विश्वानि देव सवितर्दुरितानि परासुव।
यद् भद्रं तन्न आ सुव॥ —यजुः ३०/३

संस्कृतं संसारस्यैव सर्वप्राचीना भाषा वर्तत इत्यत्र पौरस्त्यानां पाश्चात्त्यानाञ्च अनेकेषां पण्डितानामेकमतं प्राप्यते। एतत् सर्वप्राचीनमेव नास्ति अपितु विविध-ज्ञान-विज्ञान-वैभवपरिलसितं संस्कृतवाङ्मयं सर्वसमृद्धञ्च वर्तते। संस्कृतस्य एतादृशं विशालं वाङ्मयं दृष्ट्वा इदं सत्यमिव प्रतिभाति यत्— संस्कृते किं न विद्यत इति। विश्वसंस्कृतेर्मूलमिदं संस्कृतवाङ्मयमस्य आधुनिकस्य संसारस्य च अनेकैर्विषयैः परिपूर्णमस्ति। सम्प्रति समग्रे संसारे प्रमुखाकर्षणविषयरूपेण इदं सर्वत्र व्याप्तं वर्तते। किं बहुना, संस्कृतवाङ्मयस्य एकेनैव योगविज्ञानेन इदानीन्तनमिदं जगत् कम्पमानमनुभूयते चेद् यदा तु बहुशो जनाः संस्कृतं सर्वसमृद्धवाङ्मयमस्तीति स्वयं ज्ञास्यन्ति, तदानीं किं भवेत्? निश्चयेन हि जय-जयध्वनिना यत्र तत्र संस्कृतवाङ्मयस्य सम्मानो भवेत्।

अस्मिन् संसारे इदानीं संस्कृतवाङ्मयस्याध्येतॄणां सङ्ख्या प्रतिदिनं वर्धमानं वर्तते। पाश्चात्त्येषु च देशेषु अस्य अत्यधिकः प्रचारो वर्तते। तेषु केचन संस्कृतभाषामाध्यमेनैव अध्ययनं कुर्वन्ति चेत् केचित्तु अनूदितानां ग्रन्थानां साहाय्येन पठन्ति। भाषामाध्यमं यत्किमपि भवेत् परन्तु संस्कृतवाङ्मयस्य ग्रन्थानामध्ययनानुसन्धानकार्येषु कोटिशो जनानां प्रवृत्तिर्जायमाना दृश्यत इति एतेनैव वाङ्मयमिदं सर्वजनप्रियं सर्वजनहितकरञ्च वर्तत इति अनुमातुं शक्यते।

अत एव तु संस्कृतमूलिकापि पत्रिकेयमस्माभिः त्रैभाषिकी सम्पादिता अस्ति। संस्कृतवाङ्मयानुसन्धानेऽधिकाधिकानां प्रवृत्तिर्भवेदिति धियास्माभिरियं व्यवस्था कृतास्ति। चिरकालाद् अवरुद्धप्रकाशनाया अस्याः संस्कृतसुरभेः पुनःप्रकाशनस्य प्रथमायासोऽयं सर्वेषां कृते सन्तोषकरो भवेदिति च आशास्महे।

अन्त्ये, अस्मिन् विभागे कार्यरताः सहप्राध्यापकः डा. माधवप्रसादोपाध्यायः, उपप्राध्यापकः श्रीरोहिणीराजः तिमिल्सिना, आंशिकः शिक्षकः डा. सुबोधः शुक्लश्च साधुवादार्हाः सन्ति, येषां महानुभावानां कार्यकौशलेन एव इदं कार्यं सम्पन्नं जातम्। तथैव अस्मिन् सन्दर्भे अस्माकं परमस्नेहभाजं स्व. जनार्दन-घिमिरेवर्यमपि स्मरन् तस्मै श्रद्धाञ्जलिमर्पयामि, योऽस्याः पत्रिकायाः शीघ्रतया प्रकाशनाय वारम्वारं प्रोत्साहयति स्म। एवञ्च विभागस्य कार्येषु सदैव तन्मयतया कार्यसम्पादनशीलाभ्यां दुर्गाशर्मा-ईश्वरीभ्याम् धन्यवादान् अर्पयामि। एवमेव यथासमयं पत्रिकायाः सज्जताकर्त्रेऽस्माकं छात्राय सानुबाबु-आचार्याय शुभाशिषो ददामि।

– प्रधानः सम्पादकः

CC-0. Nepal Sanskrit Academy, Kathmandu

ओ३म्

शुभः लाभः

संस्कृतनिवहः

यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम् ।
रावणं मन्यमाना सा सीता भीता भविष्यति ॥

- वाल्मीकिरामायणम्, सुन्दरकाण्डम् २८/१८

CC-0. Nepal Sanskrit Academy, Kathmandu

प्रपञ्चचर्चायां समाजचित्रणम्

प्रा.डा. नारायणप्रसाद-गौतमः*

शोधसारः

संसारसागरे निमग्नो मानवः सांसारिकप्रपञ्चैर्व्याकूलः सन् लक्ष्यपराङ्मुखो जायते। ईश्वरानुकम्पया कदाचन यस्य कस्यापि मनसि यदि स्वापराधबोधो जायते, तदा तदपराधप्रमार्जने भगवन्तं विहाय नान्यः कश्चनोपायः । अपराधबोधोऽपि भाग्यवतां हृद्येव जायते । मानवजीवने जननशीलानां मनोवृत्तीनां विश्लेषणं कुर्वता कविना मनोविज्ञानस्य धरातले संस्थाय जागतिकप्रपञ्चानां देश-काल-वयःपरिस्थिति-परम्परा-संस्कृतिसापेक्षा चर्चाऽत्र कृतेति काव्यनाम सार्थकम् ।

शब्दकुञ्ची

व्यतिक्रमम्, भगवत्प्रार्थना, विकृतिः, स्पर्शदोषः, श्रद्धाविषयः, ब्रह्मज्ञानी, साक्षात्कारः, प्रतिग्रहः, अन्त्येष्टिः, क्षमस्व, वन्दनम्, गोविन्दः, स्तुतिकाव्यम् ।

विषयप्रवेशः

द्विषष्टिसङ्ख्यकैः पद्यैरन्वितायामस्यां प्रपञ्चचर्चायां कविना कुलचन्द्रगौतमेन सर्वसाधारणजनमनोभावजन्यचर्चया सह कविसम्बद्धा जीवनप्रपञ्चपरिचायकाः सांसारिकापराधा विषयीकृताः सन्ति। अस्याः प्रपञ्चचर्चायाः सम्यगनुशीलनेन कविकालिकः समाजः, कवेर्मनोभावः, कविजीवनस्येतिहासश्च प्रत्यक्षीकृता इव भवन्ति । परिवार-धन-पद-मान-सुखलिप्सापीडितैः शाश्वत आनन्दो न कदापि लब्धुं शक्यते । तल्लाभाय तु केवलं गोविन्दचरणाश्रय एव शरणं विधेयम् इत्यस्य काव्यस्य प्राणतत्त्वम् । अस्मिन् लघुकाव्ये प्रतिपद्यान्तं "क्षमस्व गोविन्द! मम व्यतिक्रमम्"[१] इत्यभिधाय स्वापराधपरिमार्जनोत्सुकः कविरन्यान् स्वसदृशान् प्रपञ्चजन्यं विकारं प्रदर्श्य व्यतिक्रममपाकरणाय भगवत्प्रार्थना एवोपाय इति मार्गदर्शनं करोति।

---

१ प्रभूतपापाध्वनिबद्धचेतसः स्वबन्धुताशंसितरोदनध्वनेः ।
अजानतः शैशवदूषितात्मनः क्षमस्व गोविन्द ! मम व्यतिक्रमम् ॥
–गौतमः कुलचन्द्रः, प्रपञ्चचर्चा, वि.सं. १९९३, श्लोकः २

---

* प्रमुखः, संस्कृत-केन्द्रीय-विभागः, त्रिभुवन-विश्वविद्यालयः, कीर्तिपुरम्

CC-0. Nepal Sanskrit Academy, Kathmandu

"पापं क्षरति कीर्तनात्" इति सिद्धान्तमनुसृत्य संसारे दोषरहितः कोऽपि नास्ति इत्याशयेन आत्मालोचनपूर्वकं कायवाङ्मनोभिर्बाल्यादारभ्य वार्धक्यपर्यन्तं कृतानां व्यतिक्रमाणां स्मरणेन व्याकुलः कविः "बालानां रोदनं बलम्" इति बालबलं मनसि कृत्वा द्वितीयपद्यादारभ्य अन्तिमपद्यपर्यन्तं "क्षमस्व गोविन्द ! मम व्यतिक्रमम्" इति वाक्यं प्रयुज्य भगवत्सन्निधौ सविनयं क्षमायाचनं कुरुते।

स्वमुखेन स्वदोषस्य कीर्तनात् प्रायश्चित्तं भवतीत्यवधारणया शैशवे कौमारे पौगण्डे च कृतानां व्यतिक्रमाणां सामान्यदोषकीर्तनं विधाय यौवने युवतिदास्यत्वाद् मातृपितृतिरस्कारेण जातानामपराधानां कृते क्षमायाचनां कुरुते।

कुलचन्द्र–गौतमस्य समस्तेषु काव्येषु भावप्राधान्यं प्राप्यते। तथैव समाजे धर्मसंस्कृतिसभ्यतानां विकासो भवतु इति धिया कविः काव्यप्रणयनं करोति। तस्य कवेः काव्यप्रबन्धेषु सर्वाधिकतया समाजस्य चित्रणकृत् काव्यप्रबन्धः प्रपञ्चचर्चा एव दृश्यते।

यद्यपि प्रपञ्चचर्चा भगवन्तं श्रीकृष्णं प्रति भक्तिभावप्रदर्शकं भक्तिवादि काव्यमेव, तथापि कविना स्पष्टतया पुरतो वर्तमानस्य स्वाश्रितस्य समाजस्य प्रतिबिम्ब इह समुपस्थापितोऽस्ति। कविना प्रपञ्चचर्चायां स्वजीवनकालिकस्य समाजस्य चित्रणं प्रस्तुतमिति स्पष्टम्।

अत्र प्रपञ्चशब्देन स्वानुभूतस्य समाजस्य आचारविचाराः तत्रत्या विकृतयो ज्ञायन्ते। इदं काव्यं विकृतिदर्शकं व्यतिक्रमपरिगणनरूपञ्चेति च वक्तुं शक्यते।

काव्यस्य सामाजिकविकृतिप्रदर्शकत्वम्

तदानीन्तने समाजे केचन कृतविवाहा युवका जन्मदायिनीं मातरम् अवमानयन्ति स्म। इदानीन्तु तादृशी अवस्था बहुत्र दृश्यते स्म। अस्या विकृतेः कविना साधुतया संसूचनं विहितम्।[२] अत्र कविर्यौवने युवतिदास्येन उन्मादपूर्वकं पूज्यपूजाव्यतिक्रमेण मातृपितृतिरस्कारेण जातानामपराधानां कृते क्षमायाचनां कुरुते।

केचन पत्न्या एव दासाः कामुका सन्तः तया सह नर्मपरिहासादिकाले यदि सुहृद्जनाः स्वं साक्षात्कारं कर्तुमागच्छन्ति, तदा बहिरेव न निर्गच्छन्ति, यद्वा निर्गच्छन्ति चेत् क्रोधरक्ताभ्यां नेत्राभ्यां तान् पश्यन्तीति प्रतिपाद्य कविना सामाजिकजीवने कुत्रचित् यौवनोन्मादेन शिष्टाचारह्रासस्य

२ युवत्वमाद्यन्मनसः प्रसूद्विषः सहायजायाजनदासताजुषः।
विदग्धतादग्धविशुद्धपद्धतेः क्षमस्व गोविन्द ! मम व्यतिक्रमम्॥
–पूर्ववत् ७

CC-0. Nepal Sanskrit Academy, Kathmandu

सङ्केतः प्रदत्तः ।[३] अत्र येऽभ्यागताः सम्माननीयाः पूज्या मान्याः च भवन्ति, तेष्वागतेषु न कदापि कष्टानुभविना भाव्यम् । अभ्यागतस्य सम्मानमस्माकं संस्कारोऽस्ति इत्याशयेन वर्णाश्रमधर्मो निश्छलतापूर्वकं सेवनीयः ।

राणाशासनकाले द्वादशमासिकी द्यूतक्रीडा नासीत् परन्तु कार्तिकमासस्य यमपञ्चके पञ्च दिनानि यावद् द्यूतक्रीडा सर्वकारद्वारा अनुमतासीत् । नित्यनैमित्तिककर्माणि विहाय रात्रिन्दिवं द्यूतक्रीडायां निरतान् तदानीन्तनान् सामाजिकान् विलोक्य कविरुद्विग्नः सन् तत्परिहाराय प्रकारान्तरेण भगवन्तं सम्बोधयति ।[४]

समकालिके समाजे क्रमशो धर्मविमुखान् वर्णाश्रमसंस्कृतिप्रतिकूलाचरणान् वर्णाश्रम-वेद-शास्त्र-गुरु-पितृ-निन्दापरान्भोजनादिषुपूर्वजसम्मानितांशुद्धिप्रधानांपरम्परांविहायस्वादैकलक्ष्यान् जनान् विलोक्य दुःखितो भगवत्प्रार्थनापरश्च कविः प्रपञ्चचर्चानिरूपित-सम्बद्ध-विषयचर्चा-माध्यमेन तदानीन्तनं समाजचित्रं प्रस्तौति ।[५]

तथैव विवाहादिषु उत्सवेषु एकपङ्क्तौ स्थितिपूर्वकं भोजनम्, सामाजिकानां भक्ष्याभक्ष्यविवेकाभावश्चेति विषयाविमौ कविहृदयं व्यथयतः ।[६] अत्र कवेराशयोऽस्ति- "तीर्थेषु विवाहेषु यात्रायां संग्रामेषु देशविप्लवेषु नगरदाहेषु ग्रामदाहेषु[७]

आपत्समये महामारीभयेषु अन्यपीडासु आप्तजनाज्ञासम्पादनेषु स्पर्शदोषो ब्राह्मणो भूत्वापि अस्वीकृत इति मम व्यतिक्रमम् ।

---

[३] जनीसहास्या सुखविघ्नतां गतान् दिदृक्षमाणान् सुहृदोऽपि सम्मतान् ।
दिधक्षतः प्रज्वलितेन चक्षुषा क्षमस्व गोविन्द ! मम व्यतिक्रमम् ॥
-पूर्ववत् ८

[४] जपार्थिनस्तत्क्षणजातया शपात् प्रमीलयापातयतोऽक्षमालिकाम् ।
दिवानिशं द्यूतदिनेषु जाग्रतः क्षमस्व गोविन्द ! मम व्यतिक्रमम् ॥
-पूर्ववत् ४२

[५] जनैर्विवाहादिषु सायमागतैः सहर्षमुच्चावचकर्मजातिभिः ।
क्षतत्रपं योजितजानुजक्षतः क्षमस्व गोविन्द ! मम व्यतिक्रमम् ॥
-पूर्ववत् ४७

[६] यस्तु शूद्रैः समश्नीयाद् ब्राह्मणोऽप्येकभोजने ।
आशौचं विधिवत्तस्य शौचमत्र विधीयते ।
-म.भा.अ.प. १३६ टिप्पण्यां ५६ पृष्ठे

[७] तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे ।
नगरग्रामदाहे च स्पृष्टास्पृष्टि न दुष्यति ॥ -पूर्ववत्, पृ. ५६

CC-0. Nepal Sanskrit Academy, Kathmandu

पौरस्त्यवाङ्मये गौर्मातृवत् पूज्याभिमता। वैद्यकग्रन्थेषु च गोदुग्धस्य गोमुत्रस्य च महिमा भृशं वर्णितो वर्तते। तदानीन्तने समाजे स्वार्थान्धानां जनानां मातृवत् पूज्यासु गोषु श्रद्धाक्षयं वृद्धानां गवां निष्कासनं पयस्विनीनामेव संरक्षणं संलोक्य, गोपालनं विहाय महिषीपालनपरम्परा प्रचलिता। इदानीमपि सा परम्परा विद्यमानास्ति। जनाः पञ्चगव्यपानमपि सम्प्रति घृणास्पदं मन्यन्ते। एतादृशीं विकृतिं दृष्ट्वा स्वान्तं नितान्तं व्यथते। प्रपञ्चचर्चायां कविना वर्णाश्रमिणां जनानां वेदशास्त्रप्रतिकूलाचरणप्रवृत्तिरूपा सामाजिकीविकृतिः प्रदर्शिता।[८]

नेपालीयः समाजो वैदिकधर्ममूलः। कविर्वैदिकधर्मे परमनिष्ठावानपि "अष्टवर्षा भवेद् गौरी" "गौरीं ददन्नागलोके" इत्यादि प्राक्तनमान्यतानुसारेण सुकुमारीणां कुमारीणां सुकुमाराणां कुमाराणां विवाहसंस्कारस्य विषमविवाहस्य च विरोधी दृश्यते। विशेषतो वृद्धैः[९] साकं सुकुमारीणामल्पवयस्कानां कन्यानां विवाहस्य तु स परमविरोधी, प्रतिदिनं समाजे वृद्धिमापन्नया विधवासङ्ख्यया विकलश्च। ईदृशं विवाहं स सामाजिकविकारदृष्ट्या नहि समीचीनं मनुते। एतद्दृष्ट्या कविः क्रान्तदर्शी क्रान्तिकारी च प्रतिभाति। तदानीं शिव-विष्णु-राम-कृष्ण-देवी-प्रभृतीनां प्रतिमा नेपालीयैः पूज्यन्ते स्म। इदानीमपि सा परिपाटी विद्यमानैव वर्तते। कवेः समये जनाः "किमर्थं मूर्तिपूजा क्रियत" इति प्रश्नार्थं प्रवृत्ता आसन्। निजपरम्पराया उदात्तान् भावान् ऐहिकामुष्मिकफलप्रदायिनः कृत्यविशेषान् विस्मृत्य तिरस्कृत्य च स्थितान् शास्त्राण्यधीत्य शास्त्रीयनिर्णयविपरीताचरणे प्रवृत्तान् आत्मानं शिक्षितम्मन्यमानान् श्रद्धाजिज्ञासास्थाविहीनान् वर्तमानान् जनान् विलोक्य व्यथितमानसः कविर्नितरां सम्मान्योऽपि मूर्तिपूजाविषयः पौराणिकप्रज्ञाविरतानां जनानां नहि श्रद्धाविषय इति सनातनधर्मावलम्बिनां कृते व्यथादायिनी विकृतिर्वर्तत इति विचारयति।[१०]

तथैव तदानीमष्टादशपुराणानां निन्दा कतिपयैर्जनैः क्रियमाणासीत्। समाजस्य कतिपये आधुनिकशिक्षाविकृतहृदयाः श्रीमद्भागवतादिमहापुराणानि व्यर्थप्रलापरूपाणीति कथयन्ति स्म। इयञ्च प्रवृत्तिः सनातनधर्मिणां कृते पीडादायिनी इत्याशयमाविष्कुर्वन्नसौ

---

८ निपीतदुग्दा अपि गाश्चिरं मृता जरापरीता इति दुर्भरा इति।
हिता इहामुत्र च हा ! जिहासतः क्षमस्व गोविन्द ! मम व्यतिक्रमम्॥
–पूर्ववत् ४९

९ उपेक्षमाणस्य विवाहय बालकान् विधूतधैर्यां विधवाधिकां धराम्।
त्रिविष्टपं शिष्टतया पिपासतः क्षमस्व गोविन्द ! मम व्यतिक्रमम्॥
–पूर्ववत् ५३

१० अपक्वबुद्धेः शुभसाधकं श्रुतेर्मतं त्वदीय प्रतिमार्चनक्रमम्।
जिहासतोऽनार्यजनानुषङ्गतः क्षमस्व गोविन्द ! मम व्यतिक्रमम्॥
–पूर्ववत् ५४

CC-0. Nepal Sanskrit Academy, Kathmandu

तदानीन्तने समाजे पाश्चात्त्यशिक्षाप्रभावितानां जनानां वर्धमानं प्रभावं सूचयति ।[११]

अस्मिन्नेव प्रसङ्गे त्रिचतुराणि वेदान्तवचनानि श्रुत्वा रटित्वा वा "अहन्तु ब्रह्मज्ञानी सञ्जातः" इति विचार्य नित्य-नैमित्तिक-कर्मत्यागिनो जनाः तदानीं दृश्यमाना आसन् । ज्ञानप्राप्तिं विना अहं ब्रह्मज्ञानवानिति उक्तिर्महती विकृतिरेवेति तथ्यं विशदीकरोति कविः ।[१२]

स्मरणीयं वर्तते यद् कैश्चिद् जनैः "मयात्मतत्त्वसाक्षात्कारः कृतः" "अहं ब्रह्मज्ञानी" इति मिथ्यावादाधारेण नित्यनैमित्तिककर्माणि परित्यक्तानि । इयं प्रवृत्ती रुरुक्षेत्रे रिडीप्रदेशेऽतीव विकसिता । तत्रत्या केचन सामाजिका हृषीकेशार्चनं विहाय स्वच्छन्दाः सञ्जाताः । काश्चन विधवास्तु चरित्रभष्टा अपि अभूवन्निति श्रुतचरः ।

अन्या अपि विकृतयः कविना प्रदर्शिताः । प्रतिग्रह-सम्बद्ध-ग्रहजपात् प्राप्तदक्षिणया द्यूतनिमित्तं सुरक्षा[१३] दानग्रहणं देवतावमानमिति अर्धनास्तिकता[१४] महादानं गृहीत्वा द्यूतक्रीडा[१५] निमन्त्रणां विना यजमानगृहे गमनम्[१६] निमन्त्रणातिक्रमणार्थान् प्रथमं प्राप्तं निर्धननिमन्त्रणमुपेक्ष्य पश्चाद् धनिजनस्य निमन्त्रणं स्वीकृत्य गमनम्[१७] परान्नभोजनाद् रोगप्राप्तिः[१८] निमन्त्रणदिवसे यजमानगृहे सन्ध्यायां भोजनसमर्थस्य एकादशीव्रते प्रातरेव भोजने प्रवृत्तिः[१९] एवमेव तदानीं सञ्जाताः पौरोहित्यजन्या विकृतयः प्रायः समग्ररूपेण काव्येऽस्मिन् प्रस्तुताः सन्ति । अस्मिन् काव्ये पौरोहित्य-व्यवसायजन्य-विकृतेश्चर्चया काव्यस्य चतुर्थांशो व्याप्तो वर्तते ।

निर्व्यवसायाः केचिद् निर्धना ब्राह्मणा द्रव्यलोभेन क्षत्रिय-वैश्यादिजातीनामन्त्येष्टिक्रियां स्वयं कुर्वन्ति स्म । सा परिपाटी इदानीमपि दृश्यते । अपुत्राधनिनः फलप्राप्तिनिश्चयेन बहुधनं

---

[११] विचक्षणाध्येयमहाजनादृत-प्रतीतपौराणगणावगर्हणाः ।
अलज्जमाकर्णयतः पृथग्जनान् क्षमस्व गोविन्द ! मम व्यतिक्रमम् ॥
-पूर्ववत् ५५

[१२] प्रदर्श्य वेदान्तमतं निजाः क्रिया अदान्तचित्तस्य सतो मुमुक्षतः ।
गृहस्थतामाश्रयतो बृहत्तमं क्षमस्व गोविन्द ! मम व्यतिक्रमम् ॥
-पूर्ववत् ५७

[१३] पूर्ववत् २७
[१४] पूर्ववत् २८
[१५] पूर्ववत् २९
[१६] पूर्ववत् ३१
[१७] पूर्ववत् ३२
[१८] पूर्ववत् ३९
[१९] पूर्ववत् ४०

CC-0. Nepal Sanskrit Academy, Kathmandu

दत्त्वापि यथासम्भवं ब्राह्मणहस्तेन अन्त्येष्टिं कारयन्ति स्म । कविना अत्र अन्त्येष्टिपक्षस्यापेक्षया ब्राह्मकुले समुत्पन्नस्यापि लोभाभिभूतचेतसः तत्क्रियां कुर्वतो ब्राह्मणस्य प्रवृत्तिः सङ्केतिता । कदाचन धनाप्तौ सफलो भविष्यामीति धिया धनिकानामन्धभक्त्या भगवच्चरणसेवावैमुख्येन च जातानां व्यतिक्रमणानां कीर्तनपुरःसरं कविरत्र "हे गोविन्द ! मम व्यतिक्रमं क्षमस्व" इति हार्दं वन्दनं करोति ।

निष्कर्षः

"पापं क्षरति कीर्तनात्" इति सिद्धान्तमनुसृत्य कविरत्र "गोभिर्वेदान्तवाक्यैर्वेद्यते ज्ञायत इति गोविन्दः परमात्मा" इति व्युत्पत्त्यनुसारेण "गोभिरेव यतो वेद्यो गोविन्दः समुदाहृतः" शाङ्करभाष्यवचनानुसारेण उपनिषद्वाक्यवेद्यस्य सर्वसम्प्रदायभज्यस्य परमात्मनः प्रार्थनां कृतापराधपरिमार्जनाय कृतवान् । इयं गोविन्दप्रार्थना स्वात्मकल्याणाय अन्यानपि प्रेरयन्ती स्तुतिकाव्यशिरोविभूषणतया विद्योतत इति शम् ।

सन्दर्भग्रन्थाः

अमरसिंहः — अमरकोशः, स्वयम्बोधिनी टीका, कुलचन्द्रगौतमः, ने.रा.प्र.प्र., काठमाण्डौ, नेपाल, वि.सं.२०२६

ईशादिनौ उपनिषद् — अनु. माधवप्रसाद देवकाटा, ने.रा.प्र.प्र., काठमाण्डौ, नेपाल, वि.सं.२०३०

ऋष्यशृङ्गः — अश्रूपहारः, ऋष्यशृङ्गाश्रमः, रेसुङ्गा, गुल्मी, वि.सं.२०४०

गौतमः कुलचन्द्रः — प्रपञ्चचर्चा, श्रीलक्ष्मीनारायणप्रेस, वनारससिटी, वि.सं. १९९३

गौतमः नारायणप्रसादः — कुलचन्द्रगौतमस्य काव्यात्मककृतीनां विश्लेषणम्, अप्रकाशितः शोधप्रबन्धः, २०५७

गौतमः नारायणप्रसादः — प्रपञ्चचर्चाकाव्यस्य साहित्यिकं विश्लेषणम्, साहित्यलोकः, वर्ष १५, अङ्क १, २०६९

पन्थी टीकारामः — सुधर्मा, संवत्सर प्रकाशन, चुनदेवी महाराजगञ्ज, काठमाण्डौ, वि.सं. २०५४

मनुः — मनुस्मृतिः चौखम्बा संस्कृत सीरीज, अफिस, वाराणसी, वि.सं . २०२१

मम्मटः — काव्यप्रकाशः व्याख्याकारः आचार्यविश्वेश्वरः, ज्ञानमण्डल, लि.वाराणसी, ष.सं.वि.सं.२०४२

वरदराजाचार्यः — लघुसिद्धान्तकौमुदी, व्याख्याकारः धरानन्दशास्त्री, मोतीलाल वनारसीदास, अ.सं., सन् १९७७

CC-0. Nepal Sanskrit Academy, Kathmandu

वेदेषु वायुविज्ञानाभिव्यञ्जकत्वम्

डा. माधवप्रसाद उपाध्यायः*

शोधसारः
वेदा हि मनुष्याणामभ्युदयनिःश्रेयससिद्ध्यर्थमपेक्षितानां सम्पूर्णानां ज्ञानतत्त्वानामक्षयं ज्ञानभाण्डागारम् । ईश्वरः सर्वज्ञोऽस्ति, वेदाश्च सर्वज्ञेनेश्वरेण मानवमात्रस्य कल्याणार्थं प्रदत्तं ज्ञानमस्ति । अतो वेदाः तदर्थमपेक्षितेन पूर्णज्ञानेन युक्ताः स्युरिति स्वाभाविकम् । वैदिकदर्शनेषु पञ्चमहाभूतसिद्धान्तो व्याप्तः । वस्तुतो वैदिकदर्शनानां मूलभूततत्त्वान्येव पञ्चमहाभूतानि । एतानि सन्ति– पृथिव्यप्तेजोवाय्वाकाशरूपाणि । एतेषामुत्पत्तिरेकस्मादेवमूलतत्त्वादभवत् । यथा हि शास्त्रेषु वर्णितम्– "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः, आकाशाद्वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी, पृथिव्या अन्नम्, अन्नाद्रेतः, रेतसः पुरुषः । स वो पुरुषोऽन्नरसमयः" इति ।

वायुर्हि जीवनदायिनीशक्तिरूपेणास्ति । श्वसनं विना नैव कोऽपि जीवो जीवनमाधातुं क्षमः । अतो जीवस्यजीवनार्थंवायोःशुद्धत्वमपेक्षितमित्यपिवेदानांसन्देशोदृश्यते।सामान्यप्राणाधायकतत्त्वरूपेण ज्ञानविज्ञानचैतन्यरूपदैवतरूपेण च वायोरुल्लेखः वेदेष्वनेकत्र उपलभ्यत अन्येषु वैदिकवाङ्मयेष्वपि । एवं वेदेषु वायोर्वैज्ञानिकत्वाभिव्यञ्जकत्वं प्राप्यते ।

शब्दकुञ्ची
दैवतम्, ऋग्वेदभाष्यम्, ओषधिः, स्पर्शग्राहकम्, नियुत्वान्, झञ्झा, उषा, विद्युत्, बभ्रुवर्णः, वायुविद्या, मरुद्गणः, सृष्टिशक्तिः, मातरिश्वा, शरीरान्तःसञ्चारी, भेषजम्, अभिव्यञ्जनम् ।

विषयप्रवेशः
वेदेषु ब्रह्माण्डगतानां समेषां विषयाणां ज्ञानमुपलभ्यतेऽभिव्यज्यते वा ।[1] वेदे वर्णिता अभिव्यञ्जिता

---

[1] स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः ॥ मनुस्मृतिः २.७,
यद् भूतं भव्यं भविष्यच्च सर्वं वेदात् प्रसिध्यति ॥ मनुस्मृतिः १२.९७
न वेदशास्त्रादन्यत्तु किञ्चिच्छास्त्रं हि विद्यते । निःसृतं सर्वशास्त्रं तु वेदशास्त्रात् सनातनात् ॥
–याज्ञवल्क्यस्मृतिः

---

* सहप्राध्यापकः, संस्कृतकेन्द्रीयविभागः, त्रिभुवनविश्वविद्यालयः, कीर्तिपुरम्

CC-0. Nepal Sanskrit Academy, Kathmandu

वा विषयाः प्रमुखरूपेण चतुर्षु भागेषु विभाज्यन्ते- १. विज्ञानविषयः, २. कर्मविषयः, ३. उपासनाविषयः ४. ज्ञानविषयश्च। एतेष्वपि चतुर्षु वेदविषयेषु विज्ञानविषयः प्रमुखतमोऽस्तीति विदुषां मतम्।[२]

विज्ञानान्तर्गतञ्च विषयद्वयमास्ते- प्रथमं परमेश्वरस्य विषये यथावज्ज्ञानं तदाज्ञापालनञ्च। द्वितीयमीश्वररचितानां पदार्थानां तद्गुणानाञ्च सम्यग् ज्ञानं प्राप्य यथावद्विचारं च कृत्वा तेभ्यः पदार्थेभ्यः स्वस्वकार्याणां सिद्धिः। अत्र परमेश्वरस्य यथावज्ज्ञानं ब्रह्मविद्याया विषयः। परमेश्वररचितानां पदार्थानां विचारो भौतिकविज्ञानसम्बद्धः। अयमालेखोऽप्येतत्सम्बद्धः। यतो हि अत्र परमेश्वररचितस्य वायोश्चिन्तनमन्यैः पदार्थैः सह सम्बन्धावलोकनञ्च वेदेषु यथा वर्णितमभिव्यञ्जितं वाऽस्ति, तथैव अत्रालिख्यते सङ्क्षेपतः।

पञ्चमहाभूताद्यानां भौतिकपदार्थानामुत्पत्तिक्रमदृष्ट्या वायुः द्वितीयः पदार्थः। तैत्तिरीयोपनिषदि अस्योत्पत्तिक्रमोल्लेखोऽस्ति।[३] निरुक्तकारेण यास्केन वायुम् अन्तरिक्षस्थानीयदैवतं मत्वाऽस्यार्थचिन्तनं प्रस्तुतम्। यास्कमतेऽन्तरिक्षे ये पदार्थाः सन्ति, तेषां मध्ये वायुः प्रथमागाम्यस्ति। यास्केन स्थौलाष्ठीविमतं प्रस्तूयेदमपि प्रतिपादितं महत्त्वपूर्णं तथ्यं यद्यथार्थतोऽयं वायुः आयुरेवास्ति शब्दरूपेणार्थरूपेणापीत्यत्रत्यो वकार अनर्थकश्चेति।[४] ऋग्वेदभाष्यकारेण महर्षिणा दयानन्दसरस्वतीस्वामिना स्वकीये ऋग्वेदभाष्ये वायुशब्देनेश्वरः भौतिकवायुश्च ज्ञायेत इत्युल्लिखितमस्ति।[५] लौकिकभौतिकपदार्थेषु रूपरहितः स्पर्शवाँश्च

यानीहागमशास्त्राणि याश्च काश्चित् प्रकृतयः। तानि वेदं पुरस्कृत्य प्रवृत्तानि यथाक्रमम्।
वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः। वेदो नारायणः साक्षात् स्वयम्भूरिति शुश्रुमः॥
-श्रीमद्भागवतम् ६.१.४०

प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते। एतं विदन्ति वेदेन स्तमात् वेदस्य वेदता॥
-आचार्यः सायणः, तैत्तिरीयसंहिताभाष्ये उपोद्घातः।

२ अत्र चत्वारो वेदविषयाः सन्ति,विज्ञानकर्मोपासनाज्ञानकाण्डभेदात्। तत्रादिमो विज्ञानविषयो हि सर्वेभ्यो मुख्योऽस्ति, तस्य परमेश्वरादारभ्य तृणपर्यन्तपदार्थेषु साक्षाद् बोधान्वयत्वात्॥
महर्षिदयानन्दः सरस्वती, ऋग्वेदादिभाष्यभूमिकायाम्, वेदविषयविचारः।

३ तस्माद्वा एतस्मादात्मन आकाशः सम्भूत आकाशाद्वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी, पृथिव्या ओषधयः, ओषधिभ्योऽन्नम, अन्नाद्रेतः, रेतसः पुरुषः, स वा एष पुरुषोऽन्नरसमयः॥
-तैत्तिरीयोपनिषद्। आनन्दवल्ली। प्रथमोऽनुवाकः

४ अथातो मध्यस्थाना देवतास्तासां वायुः प्रथमागामी भवति। वायुर्वातेर्वेत्तेर्वा स्याद्गतिकर्मण एतेरिति स्थौलाष्ठीविरनर्थको वकारस्तस्यैषा भवति॥
-यास्कः, निरुक्तम् १०.१

५ '.... वाति सोऽयं वायुः सर्वगत्वादीश्वरो गतिमत्त्वाद् भौतिकोऽपि गृह्यते। वेत्ति सर्वं जगत्स वायुः परमेश्वरोऽस्ति, तस्य सर्वज्ञत्वात्। मनुष्यो येन वायुना तन्नियमेन प्राणायामेन वा परमेश्वरं शिल्पविद्यामयं

CC-0. Nepal Sanskrit Academy, Kathmandu

पदार्थः वायुरित्यभिधीयते ।[६]

अमरकोशे वायोर्विंशतिर्नामानि परिगणितानि सन्ति– १. श्वसनः, २. स्पर्शनः, ३. वायुः, ४. मातरिश्वा, ५. सदागतिः, ६. पृषदश्वः, ७. गन्धवहः, ८. गन्धवाहः, ९. अनिलः, १०. आशुगः, ११. समीरः, १२. मारुतः, १३. मरुत्, १४. जगत्प्राणः, १५. समीरणः, १६. नभस्वत्, १७. वातः, १८. पवनः, १९. पवमानः, २०. प्रभञ्जनश्च ।[७]

वेदेषु वायुसन्दर्भे नैतानि विंशतिनामानि प्रयुक्तानि दृश्यन्ते । प्रमुखतयात्र प्रसङ्गानुरूपाणां १. वायुः, २. वातः ३., मरुतः/मरुद्गणाः, ४. मातरिश्वा, ५. पवनः, ६. पवमानः, ७. प्राणः, प्राणाः, प्राणादयो वेति शब्दानां प्रयोगः वैदिकदेवतारूपेण परिदृश्यते । एतासां देवतानां स्वरूपस्यावलोकनेन ज्ञायते यद् यद्यप्येते शब्दाः वायुसन्दर्भेणैव प्रयुक्ताः वेदेषु, परं नैतेषां शब्दानां प्रयोगः पर्यायरूपेणास्ति । स्वभाव–प्रभाव–कार्यक्षेत्रादिविज्ञानभेदेनेतासां विविधानां देवतानां नामादिकं कार्यवर्णनं स्तुतिर्वावलोक्यते वेदेषु । अस्य सङ्केतो यास्केनापि निरुक्ते विहितमस्ति ।[८] अस्यालेखस्य मुख्यविषयपर्यालोचनार्थमुपर्युल्लिखितानां वेदेषूल्लिखितानां दैवतनाम्नां संक्षिप्तः परिचयः वेदेषु तेषां वर्णनमाधृत्य प्रस्तूयते ।

वायुः

प्रमुखतो व्याकरणशास्त्रानुसारं 'वा गतिगन्धनयोः' इति धातोः 'कृवापाजिमिस्वदिसाध्यशूभ्य उण्' इति सूत्रेण 'उण्' प्रत्यययोगात् वायुशब्दः साध्यते । शब्दनिर्वचनचिन्तकानामन्यानामाचार्याणां विविधार्थानुरूपेण वायुशब्दसाधकत्वचिन्तनमप्यवलोक्यते । जैमिनीयब्राह्मणे लिखितं यदयं

यज्ञं वा वेत्ति जानातीत्यर्थेन भौतिको वायुर्गृह्यते । एवमेवैति प्राप्नोति चराचरं जगदित्यर्थेन परमेश्वरस्यैव ग्रहणम् । तथा एति प्राप्नोति सर्वेषां लोकानां परिधीनित्यर्थेन भौतिकस्यापि । कुतः ? अन्तर्यामिरूपेणेश्वरस्य मध्यस्थत्वात्प्राणवायुरूपेण भौतिकस्यापि ॥ –महर्षिर्दयानन्दः सरस्वती, ऋग्वेदभाष्यम् १.२.१

[६] रूपरहितः पर्शवान्वायुः । स द्विविधः नित्योऽनित्यश्चेति । नित्यः परमाणुरूपोऽनित्यः कार्यरूपः । स पुनस्त्रिविधः शरीरेन्द्रियविषयभेदात् । शरीरं वायुलोके, इन्द्रियं स्पर्शग्राहकं त्वक्सर्वशरीरवर्ती, विषयो वृक्षादिकम्पनहेतुः । शरीरान्तःसञ्चारी वायुः प्राणः । स चैकोऽप्युपाधिभेदात्प्राणाऽपानादिसंज्ञां लभते । तर्कसङ्ग्रहः, पृष्ठ ८.

[७] श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः । पृषदश्वो गन्धवहो गन्धवाहानिलाशुगाः ॥
समीरमारुतमरुज्जगत्प्राणसमीरणः । नभस्वद्वातपवनपवमानप्रभञ्जनाः ॥
अमरकोषः १.१.६१–६३.

[८] महाभाग्यात् देवताय एकात्मा बहुधा स्तूयते ।
एकस्यात्मनोऽन्ये देवः प्रत्यङ्गानि भवन्ति ॥ यास्काचार्यः, निरुक्तम्

CC-0. Nepal Sanskrit Academy, Kathmandu

वायुशब्दः 'यु' धातोः सिद्ध इति।[९] मैत्रायणीसंहितायां काठकसंहितायाञ्चास्य शब्दस्य साधुत्वं 'इ' धातोः (इण् गतौ) कल्पितम्।[१०] निरुक्तकारेण महर्षिणा यास्केन वायुशब्दस्य साधुत्वं गत्यर्थकेन 'वा' धातोः, 'वी' धातोर्वेति स्वीकृतम्।[११]

ऋग्वेदे प्रथममण्डलस्य द्वितीये सूक्ते, एकशतोत्तरैकोनचत्वारिंशत्तमे सूक्ते, चतुर्थमण्डलस्यैकविंशतितमे सूक्ते, सप्तममण्डलस्य चतुःषष्टितमे सूक्त इत्याद्यनेकेषु सूक्तेषु वायुवर्णनं स्तुतिर्वोपलभ्यते।

त्रिष्वपि श्रेणिषु विभक्तासु वैदिकदेवतासु वायुरन्तरिक्षस्थानीयो वायवीयो वा देवः। अन्तरिक्षस्थासु देवतासु वायुः प्रधानः। अस्यैव पर्यायरूपेण वातोऽप्यवलोक्यते। वायुर्वा वातोऽपि वा वेदेषु भौतिकतत्त्वानां दैवीनां तत्त्वानाञ्च बोधकः। विशिष्टतया वायुशब्देन प्राणापानादिभेदयुतः सञ्चारी वायुरित्यवगम्यते। वातशब्देन चास्य तीव्रतररूपोऽवबुध्यते। प्रमुखतया वायुः दैवतरूपेण वातश्च झञ्झादिरूपेण परिलक्ष्यते।

'नियुत्वान्' इति वायोः सुप्रसिद्धो विरुदः। अनेनेदं प्रतीयते यदस्य दैवतस्य वैशिष्ट्यमेव नैरन्तर्येण सञ्चरणशीलत्वमस्तीति। ऐतरेयब्राह्मणान्तर्गतस्य शुनःशेपोपाख्यानस्य 'चरैवेती'ति[१२] सन्दर्भः वायुसन्दर्भे समग्रतयैव सुसान्दर्भिकः प्रतिभाति। वेदेषु वायोः यद्वर्णनमस्ति तेन ज्ञायते यद् वायुः गुणत्रययुक्तो देवः —

१. वायुर्हि धूलिकाकणान्वहति पत्राणि च पातयत्युत्पातयति च।

२. यथार्थतोऽयं वायुरेव वर्षाकरो देवः। वस्तुत आकाशस्थान् मेघरूपेणावस्थितान् जलकणान् वायुरेवेतस्ततो विस्तीर्य विकीर्य च पृथिवीतले पातयति वर्षयति वा।

३. वर्षाकाले या झञ्झोत्पद्यते तस्यापि मूले वायुरेव भवति। यद्यपि वायोः यज्झञ्झाकरं रूपमस्ति तद्वेदेषु 'वात' इत्युच्यते। परमिदमपि स्वरूपं वायोरेव भेदः। वस्तुतः वायोः स्वरूपं मन्दं कोमलञ्च प्रतिभाति, वातस्य च उग्रं तीक्ष्णं कठोरञ्चेत्येतयोर्वेदेषु यद्वर्णनं

---

९ यदिदं सर्वं युते तस्माद् वायुः॥ जैमिनीय ब्राह्मणम् २.५६

१० वायुर्वा अग्नेस्तेजस्तस्माद् वायुरग्निमन्वेति॥ मैत्रेयी संहिता ३.१.१०, काठकसंहिता १९.८.

११ वायुः कस्मात्? वातेः। सततमसौ वाति गच्छति। वेतेः वा स्याद्गतिकर्मणः। अनेकार्थो वेतिः। तस्य वा गत्यर्थस्य। एतेः इति स्थौलाष्ठीविः। अस्मिन् पक्षे अनर्थको वकारः। उपजनमात्रम्। एत्यसौ इति वायुः॥ निरुक्त १०.१.

१२ द्रष्टव्यम्: ऐतरेयब्राह्मणम्, शुनःशेपोपाख्यानम्। ऐ.ब्रा. अध्याय ३२.

CC-0. Nepal Sanskrit Academy, Kathmandu

दृश्यते तेन स्पष्टतयाऽभिव्यज्यते ।

उषाया जागरणकारणः प्रकाशोद्वहसङ्केतो वा वायोर्धर्मः स्वभावो वेति वेदाध्ययनेन स्पष्टमवलोक्यते। अनेनैवाकाशमण्डलं पृथिवीमण्डलञ्च द्युतिमन्तौ जायेते इति वेदस्योक्तिः। वायोरिन्द्रेण सह घनिष्टः सुसम्बन्धो विद्यते। ऋग्वेदस्यानेकेषु स्थलेषु 'इन्द्रवायू' इति नाम्ना युगलदेवतारूपेणापि परिलक्ष्येते। वस्तुतस्तु वायुना सह यत्रेन्द्रस्य सम्बन्ध दृश्यते तत्रेन्द्रस्य तात्पर्यं विद्युदेवास्तीति प्रतिभाति। विद्युतः वायोश्च सहकार्येण वर्षादिमाध्यमेन पृथिवीस्थानां जीवजन्तूनां महदुपकारो जायत इत्यभिव्यज्यते वेदमन्त्रेभ्यः । सोऽयं वायुः सोमस्याद्यग्राहक इत्यपि वर्णनमुपलभ्यते । वस्तुतो वनस्पतीनां रसग्रहणं वायोः स्वभाव एव । वायुर्हि स्वर्गस्य पृथिव्याश्च सन्तान इत्युक्तं वेदे ।[१३] वस्तुतोऽत्र अन्तरिक्षमेव स्वर्गमिति वर्णितं प्रतिभाति। वायुर्हि जीवनाधायकं तत्त्वम्। पुनः सुस्वास्थ्यार्थं वायोः प्रवहणमत्यावश्यकमिति वेदस्य कथनम्। वायुर्हि रोगमुक्तिकारकोऽस्ति जीवनाधायकशक्तेश्चायं प्रवर्धनङ्करोति। वायुर्हि विश्वस्य कारणभूतः, मनुष्याणां जीवानां वा पिता, देवानाञ्च श्वासश्चेति वैदिकी मान्यतावलोक्यते।[१४]

ब्राह्मणग्रन्थेषु वायोः परिचयः विस्तरेणोपलभ्यते। यथा–

अयं वै वायुर्योऽयं पवते।[१५] अयं वै वायुर्योऽयं पवत एष वा इदं सर्वं विविनक्ति यदिदं किञ्च विविच्यते।[१६] वायुरनुवत्सरः।[१७] वायुर्वै देवः।[१८] अयं वै ब्रह्म योऽयं (वायुः) पवते।[१९]. अयं वै बृहस्पतिर्योऽयं (वायुः) यत् पश्चाद् वाति। पवमान एव भूत्वा पश्चाद् वाति।[२०]

वातः

वातो हि भौतिकवायोः देवता। 'वा' धातोरेव 'क्त' प्रत्यययोगाच्छिद्धो वातशब्दः।[२१] वातशब्दः वायुशब्दो वैकेनैव 'वा गतिगन्धनयोः' इति धातोः निष्पन्नः रूपः। स्वस्य गतिर्वा गन्धस्य वहनं वाप्यस्य तात्पर्यः। वेदेषु प्रयुक्तो वातशब्दस्तु 'वा' धातोः 'हसिमृग्रिण्वामिदमिलूपूधूर्विभ्यस्तन्'

---

[१३] द्र. ऋग्वेद ७.९.३.
[१४] द्र. हिन्दूधर्मकोश, राजबली पाण्डेय।
[१५] शतपथ ब्राह्मण २.६.३.७.
[१६] शतपथ ब्राह्मण १.१.४.२२.
[१७] ताण्ड्यब्राह्मण १३.३.१७
[१८] जैमिनीयोपनिषद्ब्राह्मण ३.४.८.
[१९] ऐतरेयब्राह्मण ८.२८.
[२०] तैत्तिरीयब्राह्मण २.३.९.६
[२१] द्रष्टव्यम् : संस्कृतहिन्दीकोश, वामन शिवराम आप्टे।

CC-0. Nepal Sanskrit Academy, Kathmandu

उणादिकोषः ३.८६ इति सूत्रेण 'तन्' प्रत्यये कृते निष्पन्नो भवतीत्यवबुध्यते। जैमिनीयब्राह्मण उल्लिखितं यच्छर्वं वस्तुजातं गतिशीलतामेतीति वातो भवतीति।[२२] तत्रैवायं शब्दः 'वा' धातोर्निष्पन्न इत्यप्युल्लिखितम्।[२३] षड्विंशब्राह्मणेऽप्येतदेव प्रकारान्तरेणोक्तम्।[२४]

मैत्रायणीसंहितायां काठकसंहितायाञ्चोल्लिखितं यदग्नितत्त्वस्य प्रवर्द्धकत्वमेव वातस्य वैशिष्ट्यमिति।[२५] इत्थमेव गोपथब्राह्मणानुसारं 'वय गतौ' इति धातोर्वातशब्दो निष्पन्नः स्यात्।[२६]

ऋग्वेदे द्वयोः सूक्तयोरस्य दैवतस्य स्तुतिः समुपलभ्यते। वातो हि वायोः प्रेरक आत्मतत्त्वभूतश्च देवः। वेदानां कतिपयेषु स्थानेषु वातस्य सम्बन्धः पर्जन्येन सह स्थापितोऽवलोक्यते। यथा वरुणस्य इन्द्रेण सह सम्बन्धोऽस्ति, तयोः सहवर्णनं चाप्युपलभ्यते, तथैव वातस्य पर्जन्येन सह सम्बन्धः प्रतिभाति। वस्तुतो वातो हि देवानां श्वासप्रश्वासरूपोऽस्तीत्यनुमीयते। रुद्र इव वातोऽपि रोगान्नपाकरोति, जीवनावधिं वर्धयति, शारीरिकाँश्च गुणान् बिभर्ति। वातो हि गृहेष्वमरत्वनिधिः। असौ देवः तीव्रप्रकाशोत्पादकः तीव्रवेगयुक्तश्चास्ति। वातो हि रोगनाशकः, जीवनावधिवर्धकः, शारीरिकगुणपोषकश्चास्ति। वातस्यैव कारणाद् बभ्रुवर्णस्य वायुः प्रवहति। असौ प्रातःकाले उषां प्रकाशयुक्तां विदधाति।

वातो वेगातिशययुक्तो देवः। अस्य वेगस्वरूपत्वं प्रायो देवैरश्वैश्चोपमीयते। यदाऽयं वातः सगर्जनमेति तदा नीलवर्णाकाशः पाटलः सञ्जायते, पृथ्व्याञ्च झञ्झायाः परिदृश्यं समुपस्थापयति। तदा वातेन दिशः परिपूर्णा जायन्ते। वातोऽह्यसौ सर्वस्यास्य भुवनस्य राजा। वेदेष्वस्य वातस्य रथवर्णनमप्युपलभ्यते, यो रथ आकाशे गमनं करोति, पृथ्वीञ्च धूलिधूसरितां विदधाति। वातस्य स्वरूपं न कोऽप्यवलोकितुमर्हति, तस्य घोष एव श्रूयतेतरामित्यादिकं वातस्वरूपं वेदमन्त्राणामध्ययनेनावबुध्यते। वातस्य स्वरूपसन्दर्भे शतपथ[२७]गोपथा[२८]दिब्राह्मणग्रन्थेष्वपि

---

[२२] यदिदं सर्वं वाति तस्माद्वातः॥ जैमिनीयब्राह्मणम् २.५६

[२३] वाते वाति॥ जैमिनीयब्राह्मणम् ३.११४

[२४] वाता वायन्ते॥ षड्विंशब्राह्मणम् ६.८२

[२५] वायुर्वा अग्नेस्तेजस्तस्माद् यद्रयङ्वातो वाति तदग्निरन्वेति॥ मैत्रायणीसंहिता ३.१.१०, काठकसंहिता १९.८

[२६] वातो वायात्॥ गोपथब्राह्मणम् १.३.१३

[२७] वातो हि वायुः॥ शतपथब्राह्मणम् ८.७.३.१२

यो वै प्राणः स वातः॥ शतपथब्राह्मणम् ५.२.४.९

न वै वातात् किञ्चनाशीयोऽस्ति न मनसः किञ्चनाशीयोऽस्ति तस्मादाह वातो वा मनो वेति॥

शतपथब्राह्मणम् ५.१.४.८

वातो वै यज्ञः। शतपथब्राह्मणम् ३.१.३.२६

[२८] वाग् वातस्य पत्नी॥ गोपथब्राह्मणम् २.२.९

CC-0. Nepal Sanskrit Academy, Kathmandu

सुविस्तृतं विवेचनमुपलभ्यते। वेदेषु वातशब्दस्य प्रयोगो वायुः, प्राणः प्राणा वा, गमनशीलं तत्त्वम्, वेगयुक्ताः पदार्था जन्तवो वा, विज्ञानम्, शुद्धिकारकं सुखवर्द्धकं च तत्त्वम्, ओषधिस्थवायुविज्ञानम्, वायुवेगगतिविज्ञानम्, वायुविद्या, वायोः शोधनम्, विज्ञातव्यो व्यवहार इत्यादिष्वर्थेष्वस्तीति महर्षेर्दयानन्दस्य वेदभाष्यावलोकनेनावबुध्यते।[२९]

मरुतः/मरुद्गणाः

वेदेषु मरुच्छब्दस्य प्रयोगः प्रायेण बहुवचन एवावलोक्यते। मरुच्छब्दः 'मृ' धातोर्निष्पन्नो भवति। अस्यार्थः प्रकाशनं मर्दनं वा। द्वावप्येतावर्थौ मरुतः कृते उपयुक्तौ इति प्रतीयते। यतो हि मूलत एते द्युतिमन्तो देवाः। अतो 'मर्' प्रकाशनमिति सान्दर्भिकः, पुनर्वनानां मर्दनकारणाद्द्वितीयोऽप्यर्थो ग्राह्यः। केचिद्विद्वांसः 'मृ मरणे' इति धातोर्निष्पन्नं मत्वा मरुतः प्रेतात्मनो मूर्तीकरणं मन्यन्ते। परमृग्वेदे तादृशं किमपि प्रमाणं नोपलभ्यते। ऋग्वेदस्याध्ययनेन ज्ञायते यत् मरुच्छब्दः 'मृड्' धातोः, 'मद्' धातोः, 'मृ' धातोः 'मिह्'धातोः 'मृज्'धातोर्वा रूप इति।[३०] निरुक्तानुसारं मरुच्छब्दः 'मा' धातोः 'रु' धातोश्च संयोगान्निष्पन्न अथवा 'मा' धातोः 'रुच्' धातोश्च योगान्निर्मितः किं वा 'महत्' इत्युपपदपूर्वकं 'द्रु' धातोः रूपमिति कल्पितमस्ति[३१]। देवराजयज्वामहोदयस्य निघण्टुवृत्यनुसारं

---

[२९] द्रष्टव्यम् : ऋग्वेदभाष्यम्, महर्षि दयानन्दः सरस्वती
यजुर्वेद भाष्यम्, महर्षि दयानन्दः सरस्वती
दयानन्दवैदिककोश, राजवीरः शास्त्री, पृ. ८४८,८४९.

[३०] क. ऋग्वेदे मरुच्छम्बद्धस्य 'मृड्'धातो उदाहरणानि :
मरुतो मृडयन्तु नः ॥ ऋग्वेद १.२३.१२, तेषु णो मरुतो मृडयन्तु ॥ ऋग्वेद १.१६९.५, स्तुतासो मरुतो मृडयन्तु ॥ ऋग्वेद १.१७१.३, मृडत नो मरुतो मा ॥ ऋग्वेद ५.५५.९, हये नरो मरुतो मृडता नः ॥ ऋग्वेद ५.५७.८

ख. ऋग्वेदे मरुच्छम्बद्धस्य 'मद्'धातो उदाहरणानि :
रोदसी हि मरुतश्चक्रिरे वृधे मदन्ति वीरा ॥ ऋग्वेद १.८५.१, मादयध्वं मरुतो मध्वो अन्धसः ॥ ऋग्वेद १.८५.६, धमन्तो वाणं मरुतः सुदानवो मदे सोमस्य रण्यानि चक्रिरे ॥ ऋग्वेद १.८५.१०, यद्वा मरुत्वः परमे सधस्थे यद्वावमे वृजनो मादयासे ॥ ऋग्वेद १.१०१.८, मरुद्भिरस्मिन् यज्ञे बर्हिषि मादयस्व ॥
-ऋग्वेद १.१०१.९

ग. ऋग्वेदे मरुच्छम्बद्धस्य 'मिह्'धातो उदाहरणम्-
यव्या साधारण्येव मरुतो मिमिक्षु ॥ ऋग्वेद १.१६७.४

घ. ऋग्वेदे मरुच्छम्बद्धस्य 'मिक्ष्'धातो उदाहरणम् :
स्वया मत्या मरुतः सं मिमिक्षुः ॥ ऋग्वेद ५.५८.५

ङ. ऋग्वेदे मरुच्छम्बद्धस्य 'मृज्'धातो उदाहरणम् :
मर्जयन्मरुतो दाशुषे गृहे ॥ ऋग्वेद १०१२२.५

[३१] मरुतो मितराविणो वा। मितरोचिनो वा। महद् द्रवन्तीति वा ॥ यास्कः, निरुक्तम् ११.१३

CC-0. Nepal Sanskrit Academy, Kathmandu

'मा' धातोः 'रुच्' धातोश्च योगात् मरुच्छब्दो निष्पन्नः किं वा 'मृ' धातोः 'रुति' प्रत्यययोगान्निर्मित[३२] उत वा 'मृ' धातोः 'उति' प्रत्यययोगान्निष्पन्न[३३] इत्युल्लिखितमस्ति।

मरुतो देवानां गणरूपोऽन्तरिक्षसम्बद्धश्च। वेदेषु प्रमुखत ऋग्वेदेऽस्य गणस्य महत्त्वपूर्णं स्थानं विद्यते। न्यूनत्वेन प्रायस्त्रयस्त्रिंशत्संख्याकानि सूक्तानि सम्पूर्णतया मरुद्गणसम्बद्धान्येव सन्ति ऋग्वेदे। अन्ये चापि कतिपय सूक्तानि सन्ति येषु मरुद्गणैः सहान्येषां देवतानां स्तुतिर्वर्णनं वाऽस्ति। मरुतां सङ्ख्या एकविंशतित एकशतोत्तराशीतिपर्यन्तं कथ्यते। यजुर्वेदे श्रौतग्रन्थेषु चैतेषां सङ्ख्या एकोनपञ्चाशदित्युल्लिखितं वर्तते।[३४]

मरुतां स्वरूपविषये द्विप्रकारकं व्याख्यानं प्रचलिताऽस्ति। एकेऽमुं 'झञ्झावातस्य देवता' इति मन्यन्ते। अपरे कथयन्ति यन्मरुतः वायोः दैवतस्य प्रतिनिधित्वं निर्वहन्तीति। निरुक्ते यास्काचार्येण मरुतो वर्षासम्बद्धान् मत्वैतानन्तरिक्षस्थानीयानित्युल्लिखितमस्ति। यास्कानुसारं मरुतोऽर्थः 'सुश्लिष्टत्वेन शब्दायमानाः वा प्रकाशिता वा आधिक्येन द्रवन्तो वा वर्षायमाणा वेति दृश्यते। अर्वाचीनेषु साहित्येषु मरुदित्यस्यार्थः 'वायु' इत्यर्थे सङ्कुचितः। ऋग्वैदिक दैवतदृष्ट्या मरुतोऽवश्यमेव वायुसदृशा देवाः परं ते नैव सर्वात्मना वायवः।

अरविन्दयोगिनो विचारानुसारं मरुतो जीवनशक्त्यः प्रज्ञाशक्त्यश्च वर्तन्ते, येऽस्माकं सर्वेभ्योऽपि क्रियाकलापेभ्य सत्यस्य प्रकाशान्वेषणं कुर्वन्ति। एतेऽस्माकं सत्तायाः स्नायविका जैविका वा शक्त्यः सन्ति, ये बुद्धिषु चैतन्याभिव्यक्तिरूपेण प्रकटिता भवन्ति।[३५]

ऋग्वेदे मरुतां माता 'पृश्निः'[३६]'गौ'[३७] चेत्युल्लिखितमस्ति। यास्कानुसारमियं गौः पृथ्वी चादित्यश्चेति द्वावेवेति निश्चीयते। सायणानुसारमियं भूमिः वर्तते चेदरविन्दानुसारं प्रकाश इति। वासुदेवशरणोऽग्रवालः मातृत्वस्य, ब्रह्माण्डे वर्तमानायाः सृष्टिशक्त्याश्च प्रतीकरूपेणोद्धरतीमां गाम्। मरुतो देवा आकाशपुरुषरूपाः, दिवोनर[३८] इत्युक्ताः। कदाचित् स्वयमुत्पन्ना इत्यप्युक्ता <u>मरुतः।</u>[३९] स्वमहत्त्वकारणादेते त्रिष्वाकाशेषु निवसन्ति।[४०] एकस्मिन् स्थले त्वेतान् अग्निरेवेति

३२ मातेः पूर्वं रोतेर्वोत्तरार्धम्। मितमितं वा रोचते। मितमितं वा रोचयति॥ देवराजयज्वा, निघण्टुवृत्ति १.२.१३

३३ तदेव ३.१८.६

३४ द्रष्टव्यम् : डा. प्रवेश सक्सेना, वेदों में क्या है ?

३५ द्रष्टव्यम् : श्रीअरविन्द, वेदरहस्य, भाग १,२.

३६ ऋग्वेद १.८५.२

३७ तदेव

३८ ऋग्वेद ५.५४.१०.

३९ प्र ये जाता महिना ये च नु स्वयम्॥ ऋग्वेद ५.८७.२.

४० यदुत्तमे मरुतो ध्यमे वा यद्वाधमे सुभगासो दिविष्ठ॥ ऋग्वेद ५.६०.

CC-0. Nepal Sanskrit Academy, Kathmandu

वर्णितमस्ति।[४१] मरुतामग्निना सहायं सम्बन्धः विद्युताग्निना सहैतेषां सम्बन्धं द्योतयति इति प्रतीयते। यतो ह्येतेषां सम्बन्धः विद्युतेन सहैव विशिष्टतया प्रख्यातः। ऋग्वेदस्यानेकेषु मन्त्रेषु ते विद्युतेन सह सम्पृक्ताः परिदृश्यन्ते।[४२] मरुतो गतिशीला देवता इति ऋग्वेदाध्ययनेन स्पष्टं भवति।[४३] यदा मरुतः तीव्रतया गच्छन्ति तदैते वायुरिव प्रतीयन्ते।[४४] यदा ह्येते वायुवेगेन गमनं कुर्वन्ति, तदा पर्वता अपि कम्पमाना भवन्तीति वर्णितमस्ति।[४५] अनेकेषु स्थलेष्वेतेषां वर्णनं सैनाकानामिवास्ति वेदे। एतेषां क्रोधत्वात्, भयङ्करस्वभावाच्च सर्वे भयभीताः भवन्तीत्यभिव्यक्तमस्ति।[४६] मरुद्गणाः स्थिरान् वृक्षान् चञ्चलान् कुर्वन्ति। स्वशक्त्या सर्वांश्च लोकान् पराजययुक्तान् कुर्वन्ति। मरुतोऽग्नीव दीप्तान् जलयुक्तान् मेघान् पर्जन्यान् वा छिन्ना भिन्नाश्च कृत्वा जलवर्षणकारका भवन्ति। रुद्रास्ताः पृश्निगर्भतः समुत्पादयत्। शत्रुभक्षका जलवर्षकाश्च मरुद्गणाः पर्जन्येषु विद्युद्रूपेण प्रकाशिता भवन्ति। ते जलेन पृथिवीं सिञ्चयन्ति।[४७]

मातरिश्वा

वायोः पर्यायरूपेण वेदेषु 'मातरिश्वन्' इति शब्दस्यापि प्रयोगोऽवलोक्यते। मातरि अन्तरिक्षे श्वसति गच्छति वर्धते वेति विग्रहे 'मातरि' इति सप्तम्यन्तोपपदे 'टुओश्वि वृद्धौ' इति भ्वादिगणीयधातोः 'श्वनुक्षन् पूषन्....' सूत्रेण[४८] कनिन् प्रत्ययः। अथवा मातरि श्वसिति जीवयति शेते वेति विग्रहे 'मातृ'इत्युपपदे 'श्वस् प्राणने' इत्यदादिधातोः 'कनिन्' प्रत्यये निपातनाद्रूपसिद्धिर्जायत यति विदुषां दृढं मतम्। अदादिगणान्तर्गतस्य' श्विकनिन् डिच्चेत्ययं शब्दः साध्यते।[४९] ऋग्वेदस्य 'मातरिश्वा यदमिमीत मातरि'[५०] इति वचनानुसारमयं शब्दः 'माङ्' धातोः रूप इति ज्ञायते।[५१] ऋग्वेदे बालखिल्यसूक्ते[५२] मेध्येन पृषध्रेण च सह यज्ञकर्तृरूपेणोल्लिखितोऽयं शब्दः। ऋग्वेदस्य

---

[४१] अग्नयो बृहदुक्षो मरुतः॥ ऋग्वेद ३.२६.४.

[४२] द्रष्टव्यम् : ऋग्वेद ५.५४.३, ५.५४.११.

[४३] द्रष्टव्यम् : ऋग्वेद ३.५४.३.

[४४] वातासो ये धुनयो जिगत्नवः॥ ऋग्वेद १०.७८.३.

[४५] प्रवेपयन्ति पर्वतान् यद् यामं यान्ति वायुभिः॥ ऋग्वेद ३.७.४.

[४६] भयन्ते विश्वा भुवना मरुद्भ्यः॥ ऋग्वेद १.८५.८

[४७] द्रष्टव्यम् : ऋग्वैदिकाः मरुद्देवतासम्बद्धानि च सूक्तानीति॥

[४८] उणादि. १.१५९

[४९] द्रष्टव्यम् : वामन शिवराम आप्टे, संस्कृतहिन्दी शब्दकोश

[५०] द्रष्टव्यम् : ऋग्वेद ३.२९.११.

[५१] द्रष्टव्यम् : वैदिकनिर्वचनकोषः, डा. ज्ञानप्रकाश शास्त्री

[५२] द्रष्टव्यम् : ऋग्वेद ८.५२.२.

CC-0. Nepal Sanskrit Academy, Kathmandu

दशमे मण्डले[५३] 'मातरिश्वा' इति शब्दस्योल्लेख उपलभ्यते।[५४] ऋग्वेदस्य वर्णनानुसारं[५५] अग्निः सोमश्चाकाशतोऽधः पृथिव्यामागतवन्तौ । तत्र च मातरिश्वाऽग्निं दूरत आनयत् । ऋग्वेददेऽस्य मातरिश्वनोऽर्थो विद्युदित्यनेकेषां मतम्। झञ्झाऽप्यस्यार्थ इत्यनेकेषां मतम्। अर्वाचीनसमयेऽस्यार्थ झञ्झा एव सञ्जातोऽर्थः। विद्युच्च वायुश्च झञ्झारूपेणेकत्वतया दृष्टिगोचरत्वं यातीति चिन्तनेन ऋग्वेदीयार्थस्यापि समन्वयो भवतीति।

अरणिषु वायुषु वा योऽग्निः प्रवृद्धो भवति स एव मातरिश्वा इति ऋग्वेदाध्ययनेन सुस्पष्टं भवति। अस्य मातरिश्वनो वर्णनं ऋग्वेदे समुपलभ्यते । ऋग्वेदस्य विविधेषु स्थलेषु मातरिश्वनो वर्णनं समुपलभ्यते।[५६] ऋग्वेदानुसारं 'विवस्वान्' इत्यस्य दूतोऽपि मातरिश्वा इत्यवगम्यते। ये मातर्यन्तरिक्षे श्वसति स वायुः मातरिश्वा इति ऋग्वेदाध्ययनेन स्पष्टमवगम्यते।[५७] ऋग्वेदे मातरिश्वा इति प्राणस्य नाम इति।

पवनः

शुद्धिकारकः पवित्रीकरणहेतुर्वेत्यथेऽस्य पवन शब्दस्य प्रयोगः वेदेषु लोकेऽपि प्रचलितोऽस्ति। 'पू' धातोः 'ल्युट्' (अन) प्रत्यये कृते पवनशब्दः साध्यते। अथर्ववेदोक्तेन 'स्योना मापः पवनैः पुनन्तु'[५८] इति मन्त्राधारेणाप्यस्य शब्दस्य साधुत्वं 'पू' धातोरेवेति स्पष्टं भवति। अस्य पवन शब्दस्य प्रयोगोऽथर्ववेदेऽन्नं तृणाभ्यां पृथक्करणार्थं प्रयुक्तस्य यन्त्रस्य द्योतकरूपेणाभिव्यक्त इति म्याक्डोनलकीथमहाभागाभ्यां कथनम् ।[५९] शुद्धीकरणार्थे पवित्रीकरणार्थे वाप्यस्य पवनशब्दस्य प्रयोगोऽथर्ववेदेऽन्यत्रापि उपलभ्यते ।[६०] वस्तुतोऽयं पवनशब्दो वायोरेव भौतिकशुद्धीकरणस्वरूपपर्यायरूपेण प्रयुक्त इत्यवगम्यते । निरुक्तेऽस्य शब्दस्य प्रयोगो मुख्यतयाऽन्नशोधकतत्त्वरूपेणोल्लिखितः ।[६१] लोकव्यवहारेऽयं शब्दो गतिशीलो वायु इत्यर्थे रूढः ।

---

[५३] द्रष्टव्यम् : ऋग्वेद १०.४८.२, १०.१०५.६.

[५४] द्रष्टव्यम् : Macdonell A A & Keith A B, Vedic Index, Vol 2

[५५] द्रष्टव्यम् : ऋग्वेद ३.९.५, ६.७.४

[५६] द्रष्टव्यम् : ऋग्वेद ३.२६.२, ३.२९.११, १०.८८.१९.

[५७] द्रष्टव्यम् : ऋग्वेद १.१७१.४.

[५८] अथर्ववेद १८.३.११.

[५९] द्रष्टव्यम् : Macdonell A A & Keith A B, Vedic Index, Vol 1 (अनुवाद रामकुमार राय, पृष्ठ ५७७)

[६०] अनस्थाः पूताः पवनेन शुद्धाः शुचयः शुचिमपि यन्ति लोकम्॥ अथर्ववेद ४.३४.२.

[६१] द्रष्टव्यम् : यास्क, निरुक्त ६.९.

CC-0. Nepal Sanskrit Academy, Kathmandu

पवमानः

'पू' धातोरेव 'शानच्' प्रत्ययेन सहैव 'मुक्' इत्यस्यागमेनायं पवमानशब्दः साध्यते । म्याक्डोनलकीथमहाभागाभ्यां कथनानुसारं पवमानशब्द एतादृशः शब्दोऽस्ति यस्य ऋग्वेदे प्रायशः स्वशुद्ध्यर्थं सोमस्य कृते प्रयुक्तोऽस्ति ।[६२] कालान्तरेऽस्य प्रयोगः कतिपयेषु स्थलेषु वायोः कृतेऽपि 'परिष्कारक' इत्याशये प्रयुक्तः ।[६३] पवमानशब्दस्य वेदेषु, प्रमुखतया ऋग्वेदस्य नवममण्डले सोमसन्दर्भे प्रयुक्तोऽस्ति ।[६४] पवमान शब्दस्य सोमेन सह सोमस्वरूपेण सह वा यः सम्बन्धः परिदृश्यते तेनेदं निश्चेतुं शक्नुमो वयं यद् वायोः सोमस्यापि सम्बन्धः प्रगाढो वर्तत इति । वस्तुतः सोमस्यास्तित्वं वायौ (पवमाने) एवेति स्थिरः प्रतिभाति । वायुसोमाभ्यां सहसम्बन्धे यद् वैज्ञानिकत्वमवलोक्यते वेदेषु तदपि वनस्पतिविज्ञानदृष्ट्या पृथगनुसन्धेयो विषयः ।

प्राणः/प्राणाः/प्राणादयः

'प्र' इत्युपसर्गपूर्वकम् 'अन्' धातोः 'अच्' 'घञ्' वा प्रत्यये कृते प्राणशब्दः साध्यते ।[६५] अथर्ववेदे प्रयुक्तस्यास्य शब्दस्यार्थचिन्तनदृष्ट्यायं प्राणशब्दः 'अन्' धातोरेव रूप इत्यवगम्यते ।[६६] शतपथब्राह्मणानुसारमयं प्राणशब्दः प्रोपसर्गसंयुक्तस्य 'नी'धातो रूप इति प्रतीयते ।[६७] जैमिनीयब्राह्मणानुसारमप्ययं प्राणशब्दः 'नी'धातो एव रूप इत्यवगम्यते ।[६८] ऐतरेयब्राह्मणस्योल्लेखानुसारमप्ययंप्राणशब्दः'नी'धातोएवरूपइत्यवगम्यते।[६९] गोपथब्राह्मणेऽस्य प्राणशब्दस्यार्थानुकूलनिर्मितिः 'प्र' उपसर्गपूर्वान्नीधातोः विनोपसर्गात् 'प्री'धातोर्वेत्यवगम्यते ।[७०]

---

[६२] द्रष्टव्यम् : Macdonell A A & Keith A B, Vedic Index, Vol 1 (अनुवाद रामकुमार राय, पृष्ठ ५७७)

[६३] तदेव

[६४] आ नः पवस्व धारया पवमान रयिं पृथुम् ॥ ऋग्वेद ९.३५.१, देवेभ्यः सोम पवमान पूयसे ॥ ९.८६.३०, पवमान पवसे धाम गोनाम् ॥ ऋग्वेद ९.९७.३१, सामवेद पू. ५.७.३, पवमानः पुनातु मा ॥ अथर्ववेद ६.१९.१,२ ॥

[६५] वामन शिवराम आप्टे, संस्कृत हिन्दी कोश, पृष्ठ ६८७.

[६६] नमस्ते प्राण प्राणते ॥ अथर्ववेद ११.४.८, प्राणो ह सर्वस्येश्वरो यश्च प्राणति यच्च न ॥ अथर्ववेद ११.४.१०, यच्च प्राणति प्राणेन ॥ अथर्ववेद ११.७.२३.

[६७] एष हीमाः सर्वाः प्रजाः प्रणयति तस्यैते प्राणाः ॥ शतपथब्राह्मणम् १०.५.२.१४, यद्वै प्राणेनान्नमात्मन्प्रणयते तत्प्राणस्य प्राणत्वम् ॥ शतपथब्राह्मणम् १२.९.१.१४.

[६८] एषा हीदं देवता सर्वं प्राणयत । तद्यत् प्राणयत तस्मात् प्राणः ॥ जैमिनीय ब्राह्मण ३.३७७, प्राणो हीदं सर्वं प्राणेत । तद्यते प्राणेत तस्मात् प्राणः ॥ जैमिनीय ब्राह्मण २.५७.

[६९] उद्यन्न खलु वा आदित्यः सर्वाणि भूतानि प्रणयति तस्मादेनं प्राण इत्याचक्षते । ऐतरेयब्राह्मणम् ५.३१.

[७०] प्राणः प्रणीतानि ह भूतानि प्राणः प्रणीताः प्रणीतास्ते ॥ गोपथब्राह्मण १.२.११, प्राणो वै वायुः, प्राणमेव प्रीणाति ॥ गोपथब्राह्मण २.१.२६, प्राणो वा आयतिः, प्राणमेव तेन प्रीणाति ॥ गोपथब्राह्मण २.२.३.

CC-0. Nepal Sanskrit Academy, Kathmandu

प्राणो हि सूक्ष्मो जीवनवायुः । आरण्यकेषूपनिषत्सु चायं प्राणो विश्वस्यैकत्वभावस्य सर्वाधिकं प्रयुक्तः सङ्केतः । व्यापकत्वेन प्राणः ज्ञानेन्द्रियाणां चैतनत्वं वा प्रकटयति । यदा कदा प्राणशब्दः साधारणश्वसनं वापि बोधयति । वस्तुतोऽस्य प्राणशब्दस्योचितोऽर्थः श्वासस्यादानं विसर्जनमपि चेत्यवगम्यते । प्राणायामक्रियास्वयमेव भावोऽभिप्रेतः ।[७१] प्राणशब्दः श्वसनद्योतकः । वैदिके साहित्येऽस्य प्राणशब्दस्य प्रयोगो विस्तृतरूपेणोपलभ्यते । ऋग्वेदेऽन्येषु च वेदेष्वस्य विविधसन्दर्भ उल्लेखोऽस्ति । प्रमुखतोऽय वर्णनं विवरणमुल्लेखो वा ऋग्वेदादतिरिक्तमथर्ववेदे, आरण्यकेषु उपनिषत्सु, शतपथब्राह्मणे, जैमिनीयब्राह्मणे, मैत्रायणीसंहितायां चोपलभ्यते ।[७२] बृहदारण्यकोपनिषदि 'प्राणोऽसौ लोकः' 'प्राणः सामवेदः' 'प्राणो मनुष्या' इत्यादिपदैः प्राणस्य महिमामण्डनमुपलभ्यते ।[७३]

वेदादिषु वायुपञ्चकस्य प्राणपञ्चकस्य वा वर्णनमुपलभ्यते १. प्राणः, २. अपानः, ३. व्यानः, ४. समानः, ५. उदानश्च । तद्यथा :

हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः । उदानः कण्ठदेशे स्याद् व्यानः सर्वशरीरगः ॥
उदानः पादयोरास्ते हस्तयोरङ्गसन्धिषु । कर्मास्य देहोन्नयनोत्क्रमणादिप्रकीर्तितम् ॥

पञ्च प्राणैः सह पञ्चोपप्राणानामपि वर्णनमुपलभ्यते– नागः, कूर्मः, कृकलः, देवदत्तः, धनञ्जयश्च। शारदातिलकटीकायामेतेषां वर्णनमुपलभ्यते–

उद्गारे नाग इत्युक्तो नीलजीमूतसन्निभः । उन्मीलने स्मृतः कूर्मो भिन्नाञ्जनसमप्रभः ।
कृकलस्तु क्षुते चैव जवाकुसुमसन्निभः । विजृम्भणो देवदत्तः शुद्धस्फटिकसन्निभः ॥
न जहाति मृतं चापि सर्वव्यापी धनञ्जयः ॥

पञ्चसु दशसु वा प्राणादिवायुषु प्राणः प्रमुखो महत्त्वपूर्णश्च । यद्यप्यन्येषां चतुर्ण्णां नवानामपि वा महत्त्वं न न्यूनम् । वस्तुत एतेषां पञ्चानां दशानां वा प्राणादिभेदानां समष्टिरूपत्वेन प्राणशब्दस्य प्रयोगोऽभिप्रेत इति प्रतीयते । वायोः शरीरान्तःसञ्चारीस्वरूपो यो हि जीवनाधारकत्वेनाश्रयभूतो भवति स एव विविधरूपेण विविधनाम्ना च व्यवह्रियत इत्यवगम्यते ।

प्रायशः प्राणशब्दः श्वासमात्रमपि द्योतयति । परन्त्वस्योपयुक्ताशय 'उच्छ्वास' एवेति, नत्वस्याशयः

---

७१ हिन्दूधर्मकोश, राजबली पाण्डे, पृष्ठ ४२८

७२ द्रष्टव्यम् : Macdonell A A & Keith A B, Vedic Index, Vol 1 (अनुवाद रामकुमार राय, प्रथमो भागः) पृ. ५३

७३ द्रष्टव्यम् : बृहदारण्यकोपनिषदि प्रथमोऽध्यायः

CC-0. Nepal Sanskrit Academy, Kathmandu

श्वासस्यान्तःग्रहणमिति कतिपयानां विदुषां मतमवलोक्यते ।[७४]

वेदेषु वायुविज्ञानाभिव्यञ्जकत्वस्योदाहरणानि

विविधनामस्वरूपादियुक्तस्य वायोरुपर्युक्तविवरणानुरूपं ततोऽधिकञ्च वेदेषु तस्य वैज्ञानिकत्वाभिव्यञ्जनमुपलभ्यते । तेषामभिव्यञ्जकतानां सम्यक् स्वाध्यायेन, व्यावहारिकप्रयोगेण च भौतिके लोके मानवीयव्यवहारेष्वनेकाविष्कारकरणं नाऽसम्भवम्। परमेतस्य कृतेऽत्रोपलब्धाभिव्यञ्जकत्वस्य सूक्ष्माध्ययनप्रयोगाणामावश्यकत्वं प्रतिभाति। अत्रास्मिन् विषये वेदेषूपलब्धानां कतिपयोदाहरणानां प्रस्तुतिः सान्दर्भिकी एव।

अयं वायुः पञ्चभूतान्तर्गतः स्थूलवायुर्नास्ति, आकाशोऽपि पञ्चभूतान्तर्गत आकाशो नास्तीति विदुषामत्र मतम्॥ वैदिकदृष्ट्या वाय्वादयो प्राकृतिकशक्तिसम्पन्नाः सर्वे एव पदार्था देवतत्त्वरूपाः सन्ति ।[७५]

प्राणवायुमाध्यमेन प्राणिनां शरीरेषु जीवनाधायतत्त्वस्य सञ्चारोऽपानवायुमाध्यमेन च दोषदूरीकरणमावश्यकमिति यथार्थं प्रति सङ्केतयति वेदः ।[७६] अस्य विज्ञानं सम्यग्विदित्वा मनुष्यैः स्वस्थैरानन्दयुतैश्च भाव्यमिति वेदोपदेशः ।

वेदस्यायमपि सङ्केतोऽस्ति यद्वायवो जलानि च प्राणिनां कृते ओषधिरूपाः भवन्तीत्यवबुध्य जनैः सर्वदा विविधप्रकारकाणां जलानां वायूनाञ्च वैज्ञानिकप्रयोगमाध्यमेन सुस्वास्थ्यसम्पन्नैः सर्वव्यवहारसौकर्ययुतैश्च भाव्यमिति ।[७७]

वेदस्य कथनमस्ति यद्वायुरेव जीवनमतोऽस्य सुरक्षणं सुप्रयोगश्चास्माकं कर्तव्यत्वेनापतति—

यददो वात ते गृहे अमृतस्य निधिर्हितः । तेन नो देहि जीवसे ।[७८]

इह जगति विद्यमानानां जीवधारिणां जीवनार्थं प्राणवायोरावश्यकता भवति । मनुष्यः प्रतिदिनं प्रायेण २२००० वारं श्वसतीत्याधुनिकविज्ञानेनापि सम्मतं तथ्यम् । तदर्थं दैनिकं प्रायेण विंशतिकिलोग्रामपरिमितमात्रायां शुद्धवायोरावश्यकता भवति । शुद्धो वायुः प्राणिनां

---

[७४] द्रष्टव्यम् : Macdonell A A & Keith A B, Vedic Index, Vol 1 (अनुवाद रामकुमार राय, प्रथमो भागः) पृ. ५४

[७५] अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता .... ॥ यजुर्वेद १४.२०

[७६] युवं वायो सविता भुवनानि रक्षथ ।

[७७] आपो वाता ओषधयः तान्येकस्मिन् भुवने अर्पितानि ॥

[७८] ऋग्वेदः १०।१८६।३

CC-0. Nepal Sanskrit Academy, Kathmandu

जीवनाधाररूपोऽत एषां जीवनरक्षणार्थं वायोः शुद्धत्वमस्य दूषणराहित्यञ्चात्यावश्यकम् । तदर्थं वायोः शुद्धत्वापेक्षया वेदस्य सन्देशो महत्त्वपूर्णः । वेदः कथयति–

आसस्त्राणासः शवसानमच्छेन्द्रं सुचक्रे रथ्यासो अश्वाः ।
अभिश्रव ऋज्यन्तो वहेयुर्नू चिन्नु वायोरमृतं विदस्येत् ॥[७९]

मनुष्यैर्वायोः सुप्रयोगमाध्यमेन विविधवाहननिर्माणकार्यैः स्वसुखसाधनानामनुष्ठानं कर्तव्यमित्यस्याशयः । अक्सीजनाभिधेयप्राणवायो रक्षणार्थमत्र निर्देशः ।

आ वात वाहि भेषजं वि वात वाहि यद्रपः । त्वं हि विश्वभेषजो देवानां दूत ईयसे ॥[८०]

बाह्याभ्यन्तराक्षेपप्रयोगमाध्यमेनौषधत्वस्वरूपो वातनामको वायुरस्माकं शरीरशुद्धिकारणभूतो भवेदित्यस्याभिप्रायः ।

वात आ वातु भेषजं शम्भु मयोभु नो हृदे । प्र ण आयूंषि तारिषत् ॥[८१]

वायुर्हि तादृशमौषधमस्ति यच्छान्तिः कल्याणञ्चावापयत्यस्माकं दीर्घजीवनस्य कारणभूतञ्च भवतीति ।

वायुप्रदूषणकरणं हि पापकर्म, तस्य शोधनञ्च पुण्यकर्मेति वेदस्य विचारः । सर्वैरपि वायुदूषणकारकतत्त्वानां क्षयीकरणाय प्रयतनीयमिति वेदमन्त्राणामाशयः ।

अथर्ववेदे वायोः कार्यप्रकारगतनामानि वर्णितानि । तानीमानि सन्ति– तपः, हरः, अर्चिः, शोचिः, तेजश्च । येषां सुप्रयोगद्वारा सर्वैरपि मानवैः स्वारिगतभयमुक्तैर्भाव्यमित्युपदिष्टमस्ति–

वायो यत्ते तपस्तेन तं प्रति तप योऽस्मान्द्वेष्टि यं वयं द्विष्मः ॥१॥
वायो यत्ते हरस्तेन तं प्रति हर योऽस्मान्द्वेष्टि यं वयं द्विष्मः ॥२॥
वायो यत्तेऽर्चिस्तेन तं प्रत्यर्च योऽस्मान्द्वेष्टि यं वयं द्विष्मः ॥३॥
वायो यत्ते शोचिस्तेन तं प्रति शोच योऽस्मान्द्वेष्टि यं वयं द्विष्मः ॥४॥
वायो यत्ते तेजस्तेन तमतेजसं कृणु योऽस्मान्द्वेष्टि यं वयं द्विष्मः ॥५॥[८२]

लोके जलमग्निः वायुश्च शोधकतत्त्वरूपेण वर्त्तमानाः सन्ति। तत्रापि च जलापेक्षयाऽग्नि

---

[७९] ऋग्वेद ६.३७.३
[८०] ऋग्वेद १०.१३७.३
[८१] ऋग्वेद १०.१८६.१
[८२] अथर्ववेद २.२०

CC-0. Nepal Sanskrit Academy, Kathmandu

अग्न्यपेक्षया च वायुः शोधकतर इति वैदिकं मतम्। वेदः कथयति यद् वायोर्दूषणं तस्य क्षतिर्वास्माकं कृते हानिकारकं भवति।

पवनदेवस्य तेजः सर्वदोषनिवाकमस्ति । वायोः सङ्गठनकर्तृशक्तिर्दिव्यवाणीयुक्तशक्तिश्च विद्येते इति ऋग्वेदे उल्लिखितमस्ति । मनुष्यैरस्या शक्तेर्व्यावहारिकं रूपं सुसम्पाद्य सामाजिकोपकारकार्येषु वैयक्तिकोन्नतिसाधकत्वेन च व्यवहर्तव्यमित्यस्य भावः। वायुरैश्वर्यसम्पन्नया शक्त्या सह स्वलक्ष्यसम्पादनकार्ये मनुष्याणां सहयोगी भवति । मनुष्यैर्वायोरिन्द्रस्य च सामर्थ्येनोपकारं ग्राह्यमिति।

वायोः वैज्ञानिकरूपेण सुप्रयोगेन मानवजीवनेऽतीवकार्यसाधनत्वं सुसम्पद्यत इति स्पष्टः सङ्केतः ऋग्वेदेऽभिव्यज्यते। यथा–

वायवा याहि दर्शतेमे सोमा अरंकृताः। तेषां पाहि श्रुधी हवम् ॥१॥
वाय उक्थेभिर्जरन्ते त्वामच्छा जरितारः। सुतसोमा अहर्विदः ॥२॥
वायो तव पपृञ्चती धेना जिगाति दाशुषे। उरूची सोमपीतये ॥३॥
इन्द्रवायू इमे सुता उप प्रयोभिरा गतम्। इन्दवो वामुशन्ति हि ॥४॥
वायविन्दश्च चेतथः सुतानां वाजिनीवसू। तावा यातमुप द्रवत् ॥५॥
वायविन्द्रश्च सुन्वत आ यातमुप निष्कृतम्। मक्ष्वित्था धिया नरा ॥६॥[८३]

उपर्युल्लिखितानां मन्त्राणां भाष्यं कुर्वता महर्षिणा दयानन्दसरस्वतीस्वामिमहाभागेन यल्लिखितं तस्य सारोऽधोऽङ्कितोऽस्ति।

सर्वमूर्त्तद्रव्याधारो जीवनहेतुर्भौतिको वायुः इहागच्छेत् एषां प्रत्यक्षरूपेणोत्पन्नानां पदार्थानां रक्षणञ्च कुर्यात्। स एव वायुः सर्वं शब्दव्यवहारं श्रावयति, सर्वान् पदार्थान् स्वगत्या प्राप्नोति। ब्राह्मण स्वसामर्थ्येन सर्वे पदार्थाः सृष्ट्वा नित्यं भूष्यन्ते तथा तदुत्पादितेन वायुना च। नैव तद्वारेण विना कस्यापि रक्षणं सम्भवति। .... जीवो वायुनिमित्तेनैव शब्दानामुच्चारणं श्रवणं च कर्त्तुं शक्नोतीति। वायुर्हि अन्नधनादिसम्पन्नो भवति। अतो मनुष्यैरेतस्योपकारग्रहणं करणीयमित्याशयः। अयं वायुः स्वयमग्रगामी भूत्वा सर्वान् जनानग्रं गमयति। अतो लक्ष्यसम्पादनार्थं वायोरुपयोगः करणीय इति।[८४]

एवञ्च– **आदह स्वधामनु पुनर्गर्भत्वमेरिरे। दधाना नाम यज्ञियम् ॥**

---

[८३] ऋग्वेदसंहिता १.२.१-६.
[८४] द्रष्टव्यम् : ऋग्वेदः १.२ (महर्षिदयानन्दभाष्यम्)

CC-0. Nepal Sanskrit Academy, Kathmandu

वायोः सदुपयोगं भवेच्चेद्वायुः त्वरितरूपेणैश्वर्यशालिनमप्यानन्दं धारयति । मरुन्नामको वायुः पूज्यः, यशस्वी, अन्नादीनामुत्पादनसहायकश्च भवति ।[८५]

ऋग्वेद इदमप्युल्लिखितं यत्समयानुकूलं कार्यं क्रियेत चेन्मरुतः सर्वतोऽस्माकं कार्यकलापं पवित्रयति । अस्य कृते मानवैर्यथायोग्यानां कार्याणामभ्यासो विधेय इति–

मरुतः पिबत ऋतुना पोत्राद् यज्ञं पुनीतन । यूयं हि ष्ठा सुदानवः ॥[८६]

अथ च– अग्नेः मरुताञ्च समन्वययुक्तं सामञ्जस्यपूर्णञ्चानुष्ठानं भवेच्चेत्तत्तु लोकस्य सर्वोत्तमशक्तिसम्मपन्नत्वमधिरोहति । तत्सामर्थ्यं न देवा नैव मनुष्या अतिक्रमितुं योग्या भवन्ति । अतोऽनयोर्गुणसमन्वयमाध्यमेन सर्वा अपि भौतिकी आत्मिकी चोन्नतिः संसाधनीया इति ।[८७]

इत्थमेव शुक्लयजुर्वेदस्य वाजसनेयिसंहितायामनेकेषु स्थलेषु वायोर्वैज्ञानिकप्रयोगसम्भावनायाः सङ्केतानि विद्यन्ते । यथा–

.... वायुर्वो विविनक्तु देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना ॥[८८]

उपर्युल्लिखितस्य यजुषः भाष्यं कुर्वता महर्षिणा दयानन्दसरस्वतीस्वामिवर्येण लिखितमस्ति यत्–

गुणज्ञानं विद्यावृद्धसेवनं दुष्टानां मनुष्याणां दोषाणां वा निराकरणं सर्वपदार्थच्छेदकोऽग्निः सूर्यो वा तथा सर्वपदार्थधारको वायुश्चास्तीति विज्ञानं परमेश्वरोपासनं विद्वत्समागमं च कृत्वा सर्वा विद्याः प्राप्य सदैव सर्वार्थां सुखोन्नतिः कार्येति ।[८९]

अस्मिन्नेव मन्त्रे भाष्यकारण हरिशरणसिद्धान्तालङ्कारमहाभागेन लिखितम्

'.... प्रातःकालिकं वायुं सूर्यं च सङ्गृह्य स्वस्था विवेकयुताश्च भवेम' इति ।[९०]

यजुर्वेदस्यान्येष्वप्यध्यायेष्वनेकेषु स्थलेषु वायो वैज्ञानिकप्रयोगसम्भावनाया अभिव्यञ्जन-मवलोक्यते । यथा–

हे मनुष्याः ! यूयमेतयो रसच्छेदकधारकयोर्जगत्पालनहेत्वोः सुखकारिणाः क्रियाकाण्डस्य

[८५] द्रष्टव्यम् : ऋग्वेदः १.३ (महर्षिदयानन्दभाष्यम्)
[८६] ऋग्वेदसंहिता १.१५.२.
[८७] द्रष्टव्यम् : ऋग्वेद १.१९.१–९, (महर्षिदयानन्दभाष्यम्)
[८८] शुक्लयजुर्वेद संहिता १.१६.
[८९] यजुर्वेदभाष्यम् १.१६ (महर्षिदयानन्दभाष्यम्)
[९०] यजुर्वेदभाष्य १.१६ (हरिशरणः सिद्धान्तालङ्कारः)

CC-0. Nepal Sanskrit Academy, Kathmandu

निमित्तयोरूर्ध्वतिर्यग्गमनशीलयोरग्निवाय्वोः सकाशात् कार्याणि साधित्वा सुखेषु संस्थितिं कुरु ॥[९१]

यजुर्वेदस्यास्मिन् स्थले सङ्केतः प्राप्यते यदग्निवाय्वोः सम्प्रयोगेण वयं सुखसाधनानि सम्पादयितुं क्षमा भवामः। एतदर्थमेतयोरग्निवाय्वोर्गुणानवगम्य तयोः सुसम्प्रयोग आवश्यकः। इत्थमेवान्यस्मिन् स्थलेऽपि मनुष्यैर्मरुतान् विधिपूर्वकमाहूय, सम्प्रयुज्य सेवित्वा च सुखादिसाधनानि नित्यं सङ्ग्राह्यानीत्यभिव्यञ्जितं लक्ष्यतेऽत्रापि—

प्रघासिनो हवामहे मरुतश्च रिशादसः। करम्भेण सजोषसः॥[९२]

अस्यार्थः – वयं करम्भेण अविद्याहिंसनेन रिशादसो रिशान् दोषान् शत्रूँश्चादन्ति हिंसन्ति तान् प्रघासिनः प्रघस्तुमत्तुं शीलमेषां तान् अतिथीन् मरुत ऋत्विजश्च हवामहे आह्वयामहे॥[९३]

'वायोर्गत्यात्मकतया स्वकीयान् स्वस्य परितः स्थितांश्च दोषानपहाय स्वात्मानं सुभूषितं कुरु' इत्यनेन मन्त्रभावेनाभिव्यज्यते यद् वायुर्हि समस्तानां लौकिकानां शारीरिकाणां, मानसिकानामाध्यात्मिकानाञ्च दोषाणां दूरीकरणे सहायो भवितुमर्हतीति। एतदर्थं मनुष्यैर्वायोः सदुपयोगविज्ञानं विज्ञाय तदुपयोगार्थं विविधविद्याविकासाय यत्नशीलैर्भाव्यमिति।

अन्यस्मिन् मन्त्रे इन्द्रवायुभ्यां सोमस्योत्पादनरीत्याः सङ्केत उपलभ्यते। इन्द्रस्य वायोश्च पारस्परिकसाहचर्यमाध्यमेनोत्पादितः भौतिकविज्ञानसाफल्यरूपः सोमः प्राणिनां कृते महदुपकारको भवतीत्याशयः।[९४]

शुद्धवायुमाध्यमेन प्राणायामद्वारा स्वहृदयविकसनेन स्वजीवनस्य दिव्यत्वसम्पादनेन सहैव वायोः सदुपयोगत्वादन्तरिक्षेऽपि विविधशिल्पकलादीनां सुप्रयोगसामर्थ्यविकासो भवितुमर्हतीत्यभिव्यज्यतेऽनेन यजुर्वेदमन्त्रेण—

सं ते वायुर्मातरिश्वा दधातूत्तानाया हृदयं यद्विकस्तम्।
यो देवानां चरसि प्राणथेन कस्मै देव वषडस्तु तुभ्यम्॥[९५]

---

[९१] यजुर्वेदभाष्यम् २.१९ (महर्षिदयानन्दभाष्यम्)

[९२] शुक्लयजुर्वेदसंहिता ३.४४

[९३] यजुर्वेदभाष्यम् ३.४४ (महर्षिदयानन्दभाष्यम्)

[९४] आ वायो भूष शुचिपाऽउप नः सहस्रं ते नियुतो विश्ववार। उपो तेऽअन्धो मद्यमयामि यस्य देव दधिषे पूर्वपेयं वायवे त्वा॥१॥

उपयामगृहीतोऽसि वायवऽइन्द्रवायुभ्यां त्वैष ते योनिः सजोषाभ्यां त्वा॥२॥

– यजुर्वेदभाष्य ७.७,८. (हरिशरण सिद्धान्तालङ्कार)

[९५] शुक्लयजुर्वेदसंहिता ११.३९.

CC-0. Nepal Sanskrit Academy, Kathmandu

शुद्धवायुमाध्यमेन प्राणायामद्वारा स्वहृदयविकसनेन स्वजीवनस्य दिव्यत्वसम्पादनेन सहैव वायोः सदुपयोगत्वादन्तरिक्षेऽपि विविधशिल्पकलादीनां सुप्रयोगसामर्थ्यविकासो भवितुमर्हतीत्यभिव्यज्यतेऽन्येन मन्त्रेण।[९६]

मनुष्यैः प्राणयुक्तानामग्न्यादिपदार्थानामुपयोगं कृत्वा परस्परं प्रीत्याऽतिविषयासक्तिं विहाय सर्वस्माज्जगतो बलं सङ्गृह्य लोकोपकारः कर्त्तव्य इत्यन्यस्य मन्त्रस्य भावः।[९७]

शुक्लयजुर्वेदस्यपञ्चदशाध्यायगत एकस्मिन् मन्त्रे वायुविज्ञानाभिव्यञ्जकत्वं सुस्पष्टं प्रतिभाति

अखिलक्रियाकुशली विश्वकर्मा त्वां व्यचस्वतीं प्रशस्तं व्यचो विज्ञानं सत्करणं विद्यते यस्तां प्रथस्वतीं उत्तमविस्तीर्णविद्यायुक्ताम् अन्तरिक्षस्य आकाशस्य पृष्ठे भागे सादयतु संस्थापयतु। त्वं विश्वस्मै समग्राय प्राणाय (प्राणशक्तिहेतौ), अपानाय (दोषदूरीकरणहेतुभूतायै अपानशक्त्यै), व्यानाय (सर्वशरीरव्यापिन्यै व्यानशक्त्यै), उदानाय (कण्ठदेशं सुस्थित्वकारकभूतायै उदानशक्त्यै), प्रतिष्ठायै चरित्राय शुभकर्माचाराय अन्तरिक्षम् जलम् यच्छ, अन्तरिक्षम् प्रशस्तं शोधितमुदकं दृंहान्तरिक्षम् मधुरादिगुणयुक्तं रोगनाशकमुदकम् मा हिंसीः। यो वायुः प्राण इव प्रियस्तव स्वामी मह्या स्वस्त्या छर्दिषा प्रकाशेन शन्तमेन अतिशयेन सुखकारकेण त्वा त्वामभिवातु। सा त्वं तया देवतया सहाङ्गिरस्वद् ध्रुवा सीद।[९८]

यजुर्वेदगतस्यास्यमन्त्रस्यार्थचिन्तनेन सुस्पष्टं भवति यत्प्राणापानव्यानोदानादिरूपप्राणस्वरूपान् वायुभेदान् सम्यक् विज्ञाय भौतिकान्तरिकात्मिकादीन् मानवीयावश्यकतां परिपूर्त्यर्थमस्य वायोः सदुपयोगः कर्तव्य इति सन्देशोऽभिव्यज्यते अनेन मन्त्रार्थचिन्तनेन।

'हे प्राणधारिणो जीवाः ! यूयं वायवः स्थ' इत्युक्त्या यजुर्वेदस्य प्रथमे एव मन्त्रे गतिशीलतायाः सूक्ष्मवैज्ञानिकचिन्तनाभ्यासारम्भो दृश्यते । यथा कश्चिद् यन्त्रो दीर्घकालपर्यन्तमचालयित्वैव स्थापितोऽस्ति चेत्तस्य क्षमताया ह्रासो भवति तथैव जीवानामप्यवस्था स्यादिति मत्वा वायूनामदाहरणेनोक्तं यद् 'यूयं वायवः स्थ' इति।[९९]

यजुर्वेदे वर्णितमस्ति यद् सम्पाद्यमानकार्येषु, शिल्पविद्यासु तीक्ष्णत्वेन सह सौम्यत्वयुक्तैः पदार्थैः शक्त्या वा समन्वयात्मकरूपेण कार्यं सम्पादनीयम्। अनेन यदीन्द्रो वायुश्च परस्परं सहकार्ययुतौ स्याताम् तौ विविधासनानां व्यावहारिकप्रयोगमाध्यमेन विमानादिविद्यां सम्पादयितुं योग्यौ

[९६] शुक्लयजुर्वेदसंहिता १३.५४.
[९७] शुक्लयजुर्वेदसंहिता १४.१२.
[९८] यजुर्वेदभाष्यम् १५.१३. (महर्षिदयानन्दभाष्यम्)
[९९] द्रष्टव्यम् : शुक्लयजुर्वेदसंहितायां प्रथमोऽध्यायः प्रथमः मन्त्रः।

CC-0. Nepal Sanskrit Academy, Kathmandu

भवेताम् । एतयोर्गुणप्रवृत्यापि चिन्तनमाध्यमेन राज्यव्यवस्थादिसुशासनं स्थापयितुं चापि मानवाः समर्थाः भवेयुः । जनानां रक्षार्थं समुन्नत्यर्थञ्च विद्युदादीनां प्रयोगकुशलत्वेन मरुद्गणैः साहाय्यं प्राप्येत, समेषां कृते च लभ्येत इति । इत्थं मरुद्गणाः प्राणिनां कृते सुखसहायका रक्षकाश्च भवितुमर्हन्ति । एतदर्थमन्येषां दैवतानां सह समन्वयात्मकरूपेण मरुतां सुप्रयोग आवश्यक इत्यभिव्यज्यते मन्त्रार्थैः ।[१००]

मरुतां सम्पर्केण व्यक्तीनां वस्तूनाञ्च पारस्परिकं मालिन्यमपहाय विविधयानादिसाधनसम्पादनमाध्यमेन तैजसं, वीर्यं, बलं, सुखादिसाधनं, सामर्थ्यादिकं सम्पादनं भवितुमर्हतीत्यपि भाव ऋग्वेदस्य प्रथममण्डलान्तर्गते सप्तत्रिंशत्तमे सूक्ते सङ्केतितोऽस्ति ।[१०१]

स्वस्योन्नत्यर्थमुपासका मरुतां स्तोत्रं पठेयुः, यतो हि मरुत्सु बलं, वीर्यं, मित्रत्वं, प्रेम, समुचितसाधनानि च विद्यन्ते इति ।[१०२] (अत्र गुणवर्णनं गुणग्रहणं च स्तुतिरित्यवधेयम्) ॥

सुखसम्पादनार्थं मरुतां प्रवहणदिशां ज्ञानं तदनुरूपप्रयोगश्चावश्यकः । समुचितप्रयोगेण मरुतः यथोचितजनान् सुखिनो वैभवशालिनश्च कुर्वन्ति । जना मर्त्यरूपाणां मरुतां समुचितप्रयोगेण स्वात्मनामभयत्वं साधयितुमर्हाः भवन्ति । अग्निर्हि मरुतां मित्रं ज्ञानस्य च स्वामी विद्यत इति वेदोपदेशः । अतो अग्नेः मरुताञ्च सुप्रयोगात् सुखादिसाधनानि संयोजनीयानि । एतादृशव्यवहारेण लोकाः ज्ञनचैतन्ये, वीर्यशालित्वे, धनधान्यसंयुक्तत्वे कर्मकौशलेषु च सुसम्पन्नाः सुखिनश्च भवितुमर्हन्ति । अतोऽस्माभिर्मरुतैः सहाग्निविज्ञानं विज्ञाय तयोः सदुपयोगद्वारा सर्वाण्यपि सुखसाधनानि संयोजनीयानीति वेदोपदेशः परिलक्ष्यते ।[१०३]

वैदिकयज्ञानां वायुवैज्ञानिकत्वम्

वैदिकानां यज्ञानां प्रमुखरूपेण द्वावुद्देश्यौ स्तः – जलवर्षणं वायुशोधनञ्च । अतो वेदेषु प्रमुखतो वायुजलाग्नीनां वर्णनं तद्विज्ञानचिन्तनञ्च महत्त्वपूर्णतयोपलभ्यते । वर्षायाः सम्बन्धो वायुचक्रेण सहास्ति। वायुचक्रस्य सम्बन्धः शीतोष्णादावाधारितोऽस्ति, पुनः शीतोष्णादिकञ्च ग्रहाणामुपग्रहाणां पृथ्व्याश्च भ्रमणक्रम अवलम्बितोऽस्ति । अतः 'काले वर्षतु पर्जन्यः' इत्यादिकथनानां व्यावहारिकरूपोपस्थापनायैतेषां तत्त्वानां ज्ञानं तेषां वेदाज्ञानुरूपसत्प्रयोगश्चावश्यकः ।

उष्णत्वेन वर्षाजलेन च लघुत्वमापाद्य वायुः प्रसरणशीलो भवति । अत एव प्रमुखतया

[१००] द्रष्टव्यम् : शुक्लयजुर्वेदसंहिता २३.१-१२.
[१०१] द्रष्टव्यम् : ऋग्वेदभाष्यम् १.३७ (महर्षिदयानन्दभाष्यम्)
[१०२] द्रष्टव्यम् : ऋग्वेदभाष्यम् १.३७ (महर्षिदयानन्दभाष्यम्)
[१०३] द्रष्टव्यम् : ऋग्वेदभाष्यम् १.३८ (महर्षिदयानन्दभाष्यम्)

CC-0. Nepal Sanskrit Academy, Kathmandu

ग्रीष्मर्तौ आँधी इत्याख्यान् वायुवेगान् वयमनुभवामः । इत्थमेव वर्षर्तौ वायुस्थाने जलपूर्णत्वकारणादपि वायुः प्रस्रवणशीलो भवति । अत एव ज्योतिषमाध्यमेन ग्रहाणां भ्रमणक्रमाध्ययनद्वारा ऋतूणामवस्थापरिज्ञानानन्तरं यज्ञादिकर्माणि स्थिराणि क्रियन्ते । यतो हि वनेषु बाह्यवायोः प्रवेशः सामान्यतो नैव भवतीति कारणात् तत्र झञ्झावातादिकानां सम्भावना न्यूनत्वेनैव भवति । तत्र स्वल्पमात्रायामेव वायुवेगः परिलक्ष्यते, पुनः पर्वतातिक्रान्तेषु वनेषु वायुवेगः स्वल्पमात्रायामेव भवितुमर्हति । एतत्प्रकारकाणां यज्ञगत वायुजलाग्नीनां सम्बन्धज्ञानं तद्विज्ञानं च वेदेषु समुत्तमस्वरूप उपलभ्यते । अस्मादेव कारणात् वायुज्ञानसम्बद्धः पृथगेवैको वेद यजुर्वेदोऽस्ति । अत एव वायुर्ह्यन्तरिक्षलोकस्य प्रमुखो देवतास्ति । अथर्ववेद उल्लिखितं यद्वायुरन्तरिक्षस्याधिपतिरस्तीति ।[१०४]

वेदेषु वायोः सूक्ष्मत्वं प्रकारद्वयरूपेणाभिलक्ष्यते : १. पिण्डवायुः, २. ब्रह्माण्डवायुः । प्राणापानव्यानोदानसमाननागकूर्मकृकलदेवदत्तधनञ्जयरूपदशनामभेदको सूक्ष्मवायुः पिण्ड-सम्बद्धोऽस्ति चेदेकोनपञ्चाशच्छङ्ख्यायुक्तोसूक्ष्मवायुःब्रह्माण्डसम्बद्धः।वायोरेकोनपञ्चाशद्भेदानां वर्णनं यजुर्वेद उपलभ्यते ।[१०५] शतपथब्राह्मणेऽपि मरुतामेकोनपञ्चाशत्सङ्ख्यकभेदानामुल्लेख उपलभ्यते ।[१०६] वस्तुतस्तेषामेकोनपञ्चाशद्भेदानवगम्य वैज्ञानिकप्रक्रियामवलम्ब्य च यद्ययज्ञः क्रियते तदेव फलभाग्भवतीति । एतेषु जलवर्षणोपयुक्तविधिष्वधिकतया बलमस्तीति प्रतीयते । अस्य विचारविधेर्वर्णनं ऋग्वेदे विशदरूपेणोपलभ्यते ।

पञ्चभूतानां पारस्परिकसम्बन्धस्य सूक्ष्मत्वेन ज्ञानं वायुविज्ञानज्ञानार्थमपरिहार्यरूपेणावश्यकम् । आधुनिककाले यं प्रविधिमनुसृत्य जलाकर्षणयन्त्राणामाविष्कारो जातस्तेषां मूलेऽपि वायोः विज्ञानं वर्तत इति वेदानामध्ययनेन परिज्ञायते। वस्तुतो गत्यर्थकक्रियाकलापस्य मूले वायुरेव प्रभवतीत्यत्र न सन्देहलेशः तस्य ज्ञानं च सर्वमपि सुविस्तरेण वेदे समुपलभ्यते। एतेषामुदाहरणरूपेण कतिपयवेद-मन्त्राणां समुल्लेखोऽस्मिन्नेवालेखे प्रस्तुतोऽस्ति। अध्ययनेन स्पष्टं प्रतिभाति यद्येन विधिनाद्य भूगर्भे स्थितंजलमाकर्ष्यविविधावश्यकतायाःपूर्तिर्भवतितेनैवविधिनान्तरिक्षगतजलस्याकर्षणमप्यावश्यकं तच्छम्भवमपीति वेदेष्वभिव्यञ्जितेन जलवायुविज्ञानाध्ययनेन स्पष्टं परिलक्ष्यते । अत एव वेदः कथयति – **निकामे निकामे नः पर्जन्यो वर्षतु ।**[१०७] अस्यायं तात्पर्यो यदिच्छानुकूलं जलवर्षणं भवेत्। मनुष्यैर्वेदानुकूलाचरणं क्रियेत चेत् न तदसम्भवमद्यापीति । एतदर्थं वायुविद्याया व्यावहारिकं ज्ञानं तत्प्रयोगश्चावश्यकः ।

---

[१०४] वायुरन्तरिक्षस्याधिपतिः ॥ अथर्ववेद ५.२४.८

[१०५] द्रष्टव्यम् : यजुर्वेदः १७.८०–८५, ३९.७

[१०६] शतपथब्राह्मणम् ९.११.१.२६.

[१०७] शुक्लयजुर्वेदसंहिता २२.२२

CC-0. Nepal Sanskrit Academy, Kathmandu

अत्रावधेयमस्ति यद् वायुचक्रेषु गत्युत्पादनप्रक्रियामाध्यमेनेच्छानुकूलजलवर्षार्थमग्निविद्याया ज्ञानम् अपि तावदेवावश्यकम्। अग्निमाध्यमेन सूर्यस्य तापमुत्पाद्य वायुचक्रेष्वनुकूलगत्युत्पादनमग्नि-विद्यायाः चमत्कारजन्यं कार्यमस्ति। अत एव यज्ञानुष्ठानमिच्छानुकूलजलवर्षणस्य साधनम्। अत एवोक्तं वेदेषु यद्वयं अग्निं दूतरूपेण स्वीकुर्मः। यतोह्यग्निर्ह्यस्माकं पुरोहितोऽस्तीति। वस्तुतो वेदानुयायिभिर्याज्ञिकैरग्निं दूतरूपेण नियुज्य अन्तरिक्षस्याधिपतेर्वायोः सकाशात्सम्प्रेष्य जलवर्षणस्य सूक्ष्मं विज्ञानं वैदिककाले प्रस्तुतमद्याप्यस्याभ्यास आवश्यकः प्रतिभाति।

वायोः शुद्ध्यर्थं सुगन्धितैर्हवनीयद्रव्यैर्यज्ञः करणीयस्तेन वायोः शुद्धरूपस्य सुरक्षणं भवतीति वैदिकशास्त्राणां तदनुकर्तृणां विदुषाञ्च दृढं मतम्। वस्तुतो यज्ञः न केवलं वायुमण्डलशुद्धेः, तत्पवित्रतायाः, तस्य पौष्टिकतायाश्च कारणभूतो भवति, अपितु तेन समेषामपि प्राणिनां जीवनेषु महत्त्वपूर्णः प्रभावः समुत्पद्यते।

अन्नाद् भवन्ति भूतानि पर्जन्यादन्नसम्भवः।
यज्ञाद् भवति पर्जन्यो यज्ञः कर्मसमुद्भवः॥[१०८]

निष्कर्षः

'वर्तमानस्य विज्ञानस्य मूलाधारो विद्युच्छक्तिः, वैदिकस्य विज्ञानस्य मूलाधारस्तु प्राणशक्तिः। सेयं प्राणशक्तिर्विद्युच्छक्त्योपेक्षया नितरां व्यापिका। वस्तुतो विद्युच्शक्त्यपि प्राणशक्त्या एव भेदरूपा। परमेतादृशामनेकेषां भेदानां सन्निवेशः प्राणशक्तौ सम्भवति। प्राणरूपाणां दैवतानां पूजनं, प्रसादनं वेति यज्ञः। पुनरेतेषां तत्त्वानां सङ्गतिकरणेन मेलनमपि वा नवतत्त्वसृजनमपि यज्ञ' इति विचारः 'वैदिकसाहित्य' इत्याख्ये हिन्दीभाषायां विलिखिते ग्रन्थे बलदेवोपाध्यायमहाभागेन प्रस्तुतः।

प्राणशक्त्या सहान्यशक्तिमेलनेन यन्नवतत्त्वसृजनं भवति तदेव विज्ञानम्। अस्य विज्ञानस्याभिव्यञ्जनमनेकेषु सूक्तेषु मन्त्रेषु वा वेदानामुपलभ्यते।

शतपथब्राह्मणे सृष्ट्युत्पत्तिवर्णनक्रमे स्पष्टं विलिखितम् यत् 'यजुः' शब्दः 'यत्+जूः' इति शब्दयोगेन निर्मित इति। यदिति शब्दस्यार्थो निरन्तरं गमनशील इत्यस्ति, पुनर्जूरित्यस्यार्थः 'स्थिर' इति। शतपथश्रुत्यनुसारमेताभ्यां द्वाभ्यां तत्त्वाभ्यां सकलवस्तूनां निर्मितिरभूदिति। एतयोर्द्वयोः शब्दयोः तात्पर्यग्रहणेन स्पष्टं प्रतिभाति यदद्यतनविज्ञाने 'इलेक्ट्रोन' इति नाम्ना 'प्रोटोन' इति नाम्ना च यदभिधीयते तदेव शतपथब्राह्मणे 'यत्+जूः यजुः' इत्युक्तमिति। अनेन सिध्यति यत् वर्तमानकाले विज्ञानं यत्र विश्राम्यति, ततो वैदिकविज्ञानस्यारम्भो भवति। अस्यारम्भश्च

[१०८] श्रीमद्भगवद्गीता १.१४

CC-0. Nepal Sanskrit Academy, Kathmandu

पञ्चमहाभूतरूपा विज्ञानप्रक्रिया एवास्ति । तस्य मूलाधाररूपेण च वायुतत्त्वमाकाशतत्त्वञ्च वर्तेते। पञ्चमहाभूतसहितानामन्येषामपि पदार्थानां तत्त्वानां वा वैज्ञनिकप्रयोगचिन्तस्याभिव्यञ्जनं वेदेष्वनेकेषु स्थलेषूपलभ्येते । तेषां मध्ये वायुतत्त्वस्य वैज्ञानिकप्रयोगस्याभिव्यञ्जनस्य दिङ-्निर्देशप्रयासोऽस्मिन्नालेखे विहितमिति विनिवेदनं विद्वद्वर्येषु।

सन्दर्भग्रन्थाः

१. अथर्ववेदभाष्य, हरिशरणसिद्धान्तालङ्कार, श्री घूडमल प्रह्लादकुमार आर्य धर्मार्थ न्यास, हिन्डौन, राजस्थान, भारत, वि.सं.२०६३

२. अमरकोशः, अमरसिंहः, चौखम्बा संस्कृत पुस्तकालय, बनारस. १९५७ ई.

३. ऋग्वेदभाष्यम्, महर्षि दयानन्द सरस्वती, श्रद्धानन्द अनुसन्धान प्रकाशन केन्द्र, गुरुकुल कांगडी विश्वविद्यालय, हरिद्वार, २०११ ई.

४. ऋग्वेदादिभाष्यभूमिका, महर्षि दयानन्द सरस्वती, विजयकुमार गोविन्दराम हासानन्द, नई सडक, दिल्ली, २०११ ई.

५. एकादशोपनिषद्, डा. सत्यव्रत सिद्धान्तालङ्कार, विजयकृष्ण लखनपाल, ग्रेटर कैलाश, नई दिल्ली.

६. ऐतरेयब्राह्मणम्, महीदास ऐतरेय, चौखम्बा विद्याभवन, वाराणसी

७. काठकसंहिता, वेंकटेश्वर प्रेस, मुम्बई

८. गोपथब्राह्मणम्, वेंकटेश्वर प्रेस, मुम्बई

९. चतुर्वेदसंहिता, सम्पा. परमहंस स्वामी जगदीश्वरानन्द सरस्वती, विजयकुमार गोविन्दराम हासानन्द, नई सडक, दिल्ली, वि.सं. २०५३

१०. जैमिनीयोपनिषद्ब्राह्मणम्, वेंकटेश्वर प्रेस, मुम्बई

११. तर्कसंग्रहः, अन्नम्भट्टः, चौखम्बा विद्याभवन, वाराणसी

१२. ताण्ड्यब्राह्मणम्, वेंकटेश्वर प्रेस, मुम्बई

१३. तैत्तिरीयब्राह्मणम्, वेंकटेश्वर प्रेस, मुम्बई

१४. तैत्तिरीयसंहिताभाष्यम्, वेंकटेश्वर प्रेस, मुम्बई

१५. निघण्टुवृत्तिः, देवराज यज्वा, वेंकटेश्वर प्रेस, मुम्बई

१६. निरुक्तम्, यास्कः, भाष्य : पं. भगवद्दत्त, वृन्दावन विश्वविद्यालय, मथुरा

१७. मनुस्मृतिः, भाष्यकार : डा. सुरेन्द्रकुमार, आर्ष साहित्य प्रचार ट्रस्ट, खारी बावली, दिल्ली, वि.सं. २०५१.

१८. मैत्रेयी संहिता, वेंकटेश्वर प्रेस, मुम्बई

१९. यजुर्वेदभाष्यम्, महर्षि दयानन्द सरस्वती, श्रद्धानन्द अनुसन्धान प्रकाशन केन्द्र, गुरुकुल कांगडी विश्वविद्यालय, हरिद्वार, २०११ ई.

२०. याज्ञवल्क्यस्मृतिः, महर्षि याज्ञवल्क्यः, मोतीलाल बनारसीदास, दिल्ली

२१. वेदमा के छ ?, डा. स्वामी प्रपन्नाचार्य, साझा प्रकाशन, ललितपुर, वि.सं. २०५४.

CC-0. Nepal Sanskrit Academy, Kathmandu

२२. वेदरहस्य, (भाग १,२), श्रीअरविन्द, श्रीअरविन्द आश्रम, पांडिचेरी, भारत. १९९३ ई.
२३. वेदों में क्या है ?, डा. प्रवेश सक्सेना, डायमण्ड पाकेट बुक्स, दिल्ली
२४. वैदिक इन्डेक्स, अनु. रामकुमार राय, चौखम्बा विद्याभवन, वाराणसी, १९६२ ई.
२५. वैदिक कोषः, राजवीर शास्त्री, श्रीमद्दयानन्द वेदार्ष महाविद्यालय न्यास, ११९, गौतमनगर, नई दिल्ली–४९. वि.सं.२०६६
२६. वैदिक विचारधाराका वैज्ञानिक आधार, डा. सत्यव्रत सिद्धान्तालङ्कार, विजयकुमार गोविन्दराम हासानन्द, नई सडक, दिल्ली, २०११ ई.
२६. वैदिक निर्वचन कोष, डा. ज्ञानप्रकाश शास्त्री, परिमल पब्लिकेशन्स, शक्तिनगर, दिल्ली, २०११ ई.
२७. वैदिक साहित्य और संस्कृति, आचार्य बलदेव उपाध्याय, शारदा संस्थान, दुर्गाकुण्ड, वाराणसी, २०१० ई.
२८. शतपथब्राह्मणम्, सायणभाष्ययुतम्, नाग पब्लिशर्स, जवाहर नगर, दिल्ली, २००२ ई.
२९. श्रीमद्भगवद्गीता, स्वामी समर्पणानन्द सरस्वती, राधेलाल सर्राफ चेरिटेबल ट्रस्ट, आर्य समाज, मेरठ, १९८२ ई.
३०. श्रीमद्भागवतम्, गीताप्रेस, गोरखपुर
३१. षड्विंश ब्राह्मणम्, वेंकटेश्वर प्रेस, मुम्बई
३२. संस्कृत हिन्दी कोश, वामन शिवराम आप्टे, मोतीलाल बनारसीदास, दिल्ली
३३. सामवेद भाष्य, हरिशरण सिद्धान्तालङ्कार, श्री घूडमल प्रह्लादकुमार आर्य धर्मार्थ न्यास, हिन्डौन, राजस्थान, भारत, वि.सं. २०६३

CC-0. Nepal Sanskrit Academy, Kathmandu

आश्रयत्वविषयत्वभागिनी चितिः

रोहिणीराजः तिमिल्सिना*

शोधसारः

सुविशालं प्रपञ्चोऽयमस्मच्चाक्षुषप्रत्यक्षेण इन्द्रियगोचरतां जङ्गम्यमानोऽस्ति। अमुष्य प्रपञ्चस्य प्रत्येकं पदार्थानां किञ्चन किञ्चन अधिकरणन्तु अवश्यं वर्तते। पृथिवी अप्सु, आपः तेजसि, तेजो वायौ, वायुश्च आकाशे अधिष्ठिताः सन्ति। सर्वे पदार्थाः कस्मिँश्चित् कस्मिँश्चिद् अधिकरणे अधिष्ठिताः सन्त्येव। एवम्प्रकारेण पदार्थानामधिकरणस्य अधिष्ठानान्वेषणक्रमे चरमाधिष्ठानत्वेन यो विशिष्यते, स एव आत्मा, अविभाज्या चित्, अखण्डं ब्रह्म वा वर्तते।

शब्दकुञ्ची– अद्वितीयम्, आस्तिकः, मायावादी, सच्चिदानन्दरूपता, आश्रयः, मिथ्यात्वम्, व्यपदेशः, अनिर्वचनीयम्, वृत्तिप्रतिबिम्बितम्, अन्तःकरणवृत्तिः, उपाधियुक्तः, विषयवासना, संसारी, आश्रयत्वम्, विषयत्वम्।

विषयप्रवेशः

स एक एव प्रभुरद्वितीयः।[1] ब्रह्मेति परमात्मेति भगवानिति वा येन केनापि पदेन कीर्त्येत, परन्तु एभिः पदैर्निर्दिष्टं तत्त्वमकमद्वितीयञ्च विद्यते–

वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम्।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते॥[2]

"क्वास्ति तावत्तत् ?" इति पृच्छायां सकलस्यापि आस्तिकहृदयनिकरस्य युगपत् प्रत्युत्तरं भवति– "तत्तु यत्र कुत्रापि अस्ति, प्रतिकणं यत्र तत्र सर्वत्र अस्ति, सर्वव्यापकमस्ति तत्।"

साधारणादपि साधारणतरो विशिष्टादपि विशिष्टतरो वा जनो पृच्छ्यताम्, परन्तु प्रत्युत्तरे समेषामेव जनानामैकमत्यमेवाधिगम्यते ।

---

१ एकतामन्त्रः, श्रुतमात्रम्

२ श्रीमद्भागवतम् १/२/११

*उपप्राध्यापकः, संस्कृतकेन्द्रीयविभागः, त्रिभुवनविश्वविद्यालयः, कीर्तिपुरम्

CC-0. Nepal Sanskrit Academy, Kathmandu

परब्रह्म सर्वव्यापकमस्तीति प्राचीनकालादेव सर्वेषां श्रुतचरोऽयं विषयः परन्तु सर्वव्यापकत्वेऽपि अस्य सहसाननुभूतत्वं सर्वेषां कृते आश्चर्यास्पदीभूतं वर्तते। एतस्यैव महत आश्चर्यस्य अनावरणाय हि जिज्ञासवो विचारका दार्शनिकविवेचनपथि प्रवर्तन्ते।

सैद्धान्तिकं विश्लेषणम्

सर्वेषु दर्शनेषु दर्शनीयतमत्वेन मतं वेदान्तदर्शनं खलु श्रुत्या युक्त्या च अतीव सारल्येन प्रकृतमाश्चर्यं निराकुरुते । एतदेव न, अपितु दर्शनेनानेन एतादृशानां नैकविधानामाश्चर्याणां शल्यक्रिया सम्पादितास्ति । दर्शनेऽस्मिन् मायावादस्य सिद्धान्तोऽपि एतदर्थमेव प्रतिपादितोऽस्ति । संसारेऽस्मिन् वैचित्र्यं किमर्थमनुभूयते ? सत्यं वस्तु ब्रह्म कथं दृष्टिपथं नाधिरोहति ? प्राणिजगत् किमर्थमनवच्छिन्नानन्दानुभूतौ समर्थं नावलोक्यते ? मनुष्यसमुदायः किमर्थं क्षणिकानन्दावाप्तौ हि दत्तचित्तो वरीवर्ति ? प्रपञ्चस्य रङ्गशालायां मनुष्याणां धावनस्पर्धेयं किमर्थं चरीक्रियमाणास्ति। एवंविधानां नैकेषां कैमर्थ्याकाङ्क्षाणां समाधानस्य एक एव आधारोऽस्ति माया। मायैव तु वर्तते समग्रस्यापि अस्य संसारस्य ऐतिह्यानां साम्प्रतिकानां सम्भविष्यमाणानाञ्च प्रत्येकमनर्थानां मूलं कारणम्—

अज्ञानमेवास्य हि मूलकारणम्।[३]

वस्तुतो मायां विना प्रपञ्चस्य समुद्भवोऽनुभवश्च नहि सम्भवति। मायायाः खलु शक्तियुग्मप्रभावेण परब्रह्मणि विचित्रोऽयं प्रपञ्चः परिकल्पितोऽस्ति । मायाया आवरणशक्त्या संसारिणां कृते सत्यस्य परब्रह्मणोऽप्रतीतिर्जायमाना वर्तते चेद्विक्षेपशक्त्या सद्वस्तुनि परब्रह्मणि मिथ्या प्रपञ्चः प्रतीयमानोऽस्ति । एवं मायायाः खलु हेतुत्वेन परब्रह्मणि प्रपञ्चस्य कल्पितत्वेऽपि परब्रह्म अभासमानं सद् अस्तितावत्त्वेन तु प्रपञ्च एवावभासते। तस्मात् समग्रोऽप्ययं प्रपञ्चो मायाकार्यं वर्तते। कार्यरूपः प्रपञ्च एव न, अपितु तत्कारणरूपेयं माया च अस्मिन्नेव परब्रह्मणि अधिष्ठिता वर्तते । कल्पितत्वेन परब्रह्मणि अधिष्ठितत्वं हि परब्रह्मणो मायाविषयत्वे हेतुः । परब्रह्मणो मायाविषयत्वेन च संसारिणां कृते परब्रह्मणोऽप्रतीतिरस्ति । अनयैव अज्ञानापरपर्यायया मायया परब्रह्मण आच्छन्नत्वात् तत्त्वज्ञानाय जनानां सहजप्रवृत्तिर्नावलोक्यते।

सत्यं ज्ञानमनन्तं ब्रह्म[४], विज्ञानमानन्दं ब्रह्म[५] इत्यादीनि श्रौतवाक्यानि परब्रह्मणः सच्चिदानन्दरूपतां निर्दिशन्ति । 'सद्रूपं परब्रह्म असन्मायाया आश्रयत्वं विषयत्वञ्च कथं प्राप्नोति ?' इति

---

[३] रामगीता ९

[४] तैत्तिरीयोपनिषद् ३/६

[५] बृहदारण्यकोपनिषद् ३/९/२८

CC-0. Nepal Sanskrit Academy, Kathmandu

वक्तुमपि न शक्यते । यतो हि माया असन्न वर्तते । एवञ्च .....एकमेवाद्वितीयम्[६] श्रुतिरियं परब्रह्मणि एकत्वद्वितीयत्वयोर्विधानं कुरुते । अत ऋते परब्रह्मण इतरस्य सतो वस्तुनोऽभावाद् मायायाः सद्रूपत्वञ्च न सम्भवति । तरति शोकमात्मववित्[७] अनया श्रुत्या तत्त्वज्ञानेन माया-तत्कार्यमिथ्यात्वस्य व्यपदेशाच्च मायायाः सद्रूपत्वं न सङ्गच्छते । समग्रस्यापि प्रपञ्चस्य कारणत्वेत प्रतीयमानत्वाद् अस्या असद्रूपत्वञ्च अङ्गीकर्तुं न शक्यते। ब्रह्मसत्तयैव सत्तावती माया तस्मान्नहि विभिद्यते चेद् मिथ्या, जडात्मिका, दुःखमया च माया सच्चिदानन्दरूपाद् ब्रह्मणोऽभिन्ना च कथं प्रतिपद्येत ? पयसः परिणामो दधीव मायायाः परब्रह्मपरिणामत्वासिद्धौ इयं साङ्गा नास्ति चेद् मायाकार्यत्वेन प्रपञ्चस्य प्रतीयमानत्वाद् अनङ्गता च अस्यां सेद्धुं न शक्नोति । सदसद् भिन्नाभिन्ना साङ्गनाङ्गा इत्यादिभिर्विपर्ययपदैर्विवक्तुमशक्यत्वादेन मायेयमनिर्वचनीयास्तीति निगद्यते–

सन्नाप्यसन्नाप्युभयात्मिका नो, भिन्नाप्यभिन्नाप्युभयात्मिका नो ।
साङ्गाप्यनङ्गाप्युभयात्मिका नो, महद्भुतानिर्वचनीयरूपा ॥[८]

एतादृश्यानिर्वचनीयया मायया विचित्रस्य प्रपञ्चस्य कल्पितत्वे न कोऽपि विरोधः । माया अज्ञानरूपा, परब्रह्म च ज्ञानस्वरूपम् । 'ज्ञानाज्ञानयोः तमोरश्मिवद्विरुद्धत्वे परब्रह्मणि मायाश्रयत्वं तद्विषयत्वञ्च कथं सम्भवतीति पृच्छाया युक्तियुक्तं समाधानं विदधाति वेदान्तदर्शनम् । तथा हि परब्रह्मणः सर्वव्यापकत्वेन शुद्धेन परब्रह्मणा सह मायाया नहि कश्चन विरोधो वर्तते । विरोधस्तु वृत्तिप्रतिबिम्बितेन ब्रह्मचैतन्येन सहैव वर्तते । प्रचण्डभास्करः स्वरश्मिना शुष्काण्यपि तृणशकलानि भस्मसात्कर्तुं न शक्नोति परन्तु स एव भास्करः सूर्यकान्तसम्पर्कान्निःसृतरश्मिना सकलानि च तानि तृणशकलानि क्षणे हि भस्मीकरोति । तथैव अन्तःकरणवृत्तौ समारूढावस्थायां मायाविनाशकेऽपि ब्रह्मचैतन्ये सामान्यदशायां मायाश्रयत्वं तद्विषयत्वञ्च सम्भवति । अत एव तु वेदान्तदर्शनस्य समुद्घोषो वर्तते यद् मायाश्रयत्वं तद्विषयत्वञ्च केवलं शुद्धे ब्रह्मणि परिनिश्चितं वर्तते, न तु सोपाधिके ब्रह्मणीति–

आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला ॥[९]

कश्चन मूर्खः "नहि शुद्धेऽपितु सोपाधिके ब्रह्मण्येव मायाश्रयत्वविषयत्वे स्तः" इति ब्रवीति चेत् स प्रष्टव्यो यत् "वैज्ञानिकैः पञ्चभ्यो वर्षेभ्योऽनन्तरं रचयिष्यमाणं विमानं सम्प्रति समारुह्य

---

६ छान्दोग्योपनिषद् ६/२/१
७ श्वेताश्वेतरोपनिषद् ७/१/३
८ विवेकचूडामणिः १११
९ सङ्क्षेपशारीरकम् १/३१९

CC-0. Nepal Sanskrit Academy, Kathmandu

मङ्गलग्रहं प्रति प्रस्थातुं शक्नोसि वा ?" अथ स प्रतिप्रश्नं समुपस्थापयन् ब्रूयात्– "कथमिदं सम्भवति एवम् ?" सोपाधिके ब्रह्मणि मायाश्रयत्वं तद्विषयत्वञ्च कथं न सम्भवतीति पृच्छायाः समाधानञ्च अयं प्रतिप्रश्न इवेति बोद्धव्यम्। अत एव तु प्रोच्यते–

पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवति नापि गोचरः ॥[१०]

वस्तुत इयं माया अनादि वस्तु वर्तते ।[११] यदा तु माययानया परब्रह्मणि विचित्रोऽयं प्रपञ्चः परिकल्प्यते, तदैव परब्रह्म उपाधियुक्तम् सोपाधिकं सम्पद्यते। मायाया सम्पर्केण निर्गुणं निष्क्रियञ्च ब्रह्म स्वस्मिन् सगुणं सक्रियञ्च ईश्वरभावमादधाति । अतोऽनादिकालतः स्थितिमत्या मायाया आश्रयः तद्विषयश्च मायोपाधिकं मायाकार्यं सोपाधिकं ब्रह्म कथमिव भवितुं शक्नुयात् ? शुद्धे ब्रह्मणि मायाश्रयत्वे हि अज्ञानरूपया तथा ज्ञानरूपस्य ब्रह्मण आवृतत्वं प्रमीयते । अनेनैव हेतुना ब्रह्मात्मैक्यबोधस्य अप्रतीतौ संसारिणो जना अनादिकालतः सांसारिकासु क्षणिकविषयवासनासु समासक्ताः सन्तो दिग्भ्रमिता दरीदृश्यन्ते–

अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ।[१२]

एवम्प्रकारेण शुद्धे ब्रह्मणि मायाश्रयत्वेनैव ब्रह्मणि मिथ्या प्रपञ्चो रज्जुसर्पवत् प्रतीयमानोऽस्ति । इत्थं ब्रह्मणो मायिकाश्रयत्वविषयत्वे मायाकारणेन सञ्जातायाः परब्रह्मणोऽप्रतीतिं मिथ्या प्रपञ्चस्य प्रतीतिञ्च सङ्केतितवतीति निश्चीयते ।

निष्कर्षः

समग्रोऽपि प्रपञ्चोऽयं परब्रह्मणि कल्पनमात्रं वर्तते । तस्मिन्नेव कल्पिते प्रपञ्चे भ्रमजन्यत्वं मिथ्यात्वं वा साधयितुं वेदान्तदर्शनेन अपरा च एका कल्पना विहितास्ति, सैव माया । वस्तुतो मायाया अङ्गीकारं विना प्रपञ्चे मिथ्यात्वसिद्धिरेव असम्भवी । अत एव तु प्रपञ्चसत्यत्ववादिनो दार्शनिका मायावादस्य खण्डनायाविरतं चेष्टन्ते ।

तत्त्वज्ञानस्य प्रयोजनं किम् ? प्रपञ्चस्य मिथ्यात्वसिद्धिः । प्रपञ्चस्य मिथ्यात्वसिद्धिश्च तत्कल्पितत्वसिद्धिं विना नहि सम्भवति। परब्रह्मणि प्रपञ्चस्य कल्पककारणत्वेन मायाया

---

[१०] सङ्क्षेपशारीरकम् १/३१९

[११] जीवो ईशो विशद्धा चित्तथा जीवेशयोर्भिदा।
अविद्या तच्चितोर्योगः षडस्माकमनादयः ॥
—अद्वैतसिद्धिः

[१२] श्रीमद्भगवद्गीता ५/१५

CC-0. Nepal Sanskrit Academy, Kathmandu

उपस्थाने प्रपञ्चमिथ्यात्वस्य च स्वतोऽवबोधनात् शुद्धे शुद्ध ब्रह्मणि मायाया आश्रयत्व–विषयत्वे चर्चाविषयत्वं भजेते। अस्तु, किमधिकम् !!!

सन्दर्भग्रन्थाः

ईशादि नौ उपनिषद् शाङ्करभाष्यार्थ, गोरखपुर : गोविन्द भवन कार्यालय, वि.सं. २०६०

रामगीता (नेपाली अनुवाद एवं व्याख्यासहित), गिरि डा. स्वामी रामानन्द महेश संन्यास आश्रम, देवघाट, द्वितीय संस्करण २०५४

छान्दोग्योपनिषद् शाङ्करभाष्यार्थ, गोरखपुर : गोविन्द भवन कार्यालय, वि.सं. २०५८

बृहदारण्यकोपनिषद् शाङ्करभाष्यार्थ, गोरखपुर : गीताप्रेस, वि.सं. २०६५ द्वादश संस्करण

विवेकचूडामणि (अनुवाद), मुनिलाल, गोरखपुर : गोविन्द भवन कार्यालय, वि.सं १९८८

श्रीमद्भागवतम् महर्षिव्यासः, गोरखपुर : गीताप्रेस, वि.सं.२०५७

श्रीमद्भगवद्गीता गोयन्दका हरिकृष्णदास, शाङ्करभाष्यार्थ, गोरखपुर : गोविन्द भवन कार्यालय, वि.सं. १९८८

सङ्क्षेपशारीरकम् सर्वज्ञात्ममुनिः, चौखम्बा संस्कृत सिरिज, वनारस, सन् १९१३

न्यायामृताद्वैतसिद्धि–व्याख्या स्वामी योगीन्द्रानन्द, वाराणसी : षड्–दर्शन प्रकाशन प्रतिष्ठान, सन् १९८४ द्वितीय संस्करण

CC-0. Nepal Sanskrit Academy, Kathmandu

संस्कृतवाचः दुन्दुभिघोषः

✍ डा. सुबोधः शुक्लः*

लेखसारः

सर्वविदितं यत् संस्कृतभाषा वेदभाषातो निःसृता न तत्र कस्यापि विप्रतिपत्तिः। संस्कृतस्य विकासः ततो मूलभाषातः एव। संस्कृतस्य भाषावैज्ञानिकानि अङ्गानि एतानि अक्षरविज्ञान–धातुविज्ञान–ध्वनिविज्ञान–सन्धिविज्ञान–पदविज्ञान–वाक्यविज्ञान–अर्थविज्ञानानि अद्भूतानि दरीदृश्यन्ते अनुभूयन्ते च। संस्कृतवाङ्मये प्रायशः सर्वविधानां विज्ञानानाम् अजस्रं स्रोतः खलु निहितमस्ति कृषिविज्ञान–वनस्पतिविज्ञान–जीवविज्ञान–यन्त्रविज्ञान–शरीरक्रियाविज्ञान–ज्योतिर्विज्ञान–खगोलविज्ञानानां बीजबिन्दवो निश्चयेन वैदिकलौकिकवाङ्मययोः प्राप्यन्ते समुपलभ्यन्ते।

संस्कृतवाङ्मयं खलु द्विविधं वैदिकसंस्कृतवाङ्मयं लौकिसंस्कृतवाङ्मयञ्च। यथा वैदिकवाङ्मये उदात्तभावा उत्तमोत्तमविचारा व्यापृताः सन्ति, तथैव लौकिकसंस्कृतवाङ्मयेऽपि। संस्कृतभाषां प्रति एषा उक्तिः पूर्णरूपेण चरितार्था भवति– "रुचीनां वैचित्र्याद्दृजुकुटिलनानापथजुषाम्। नृणामेकोगम्यस्त्वमसि पयसामर्णव इव॥"

शब्दकुञ्ची– गीर्वाणवाणी, आर्यवाचा, संस्कृतवाक्शक्तिः, वैदेशिकविचारकाः, उपनिषद्, संस्कृत–वाङ्मयम्, प्रतिफलम्, क्रियाशीलाः, मानसिकशान्तिः, जीवनयशस्विता, संस्कृतिः, मूलस्वरूपस्य।

विषयविवेचनम्

संस्कृतभाषा, दैवीवाक्, गीर्वाणवाणी, गीर्वाणभारती, अमरभाषा, देवभाषा[१], परिमार्जिता, आर्यवाचा[२], परिष्कृता, व्याकरणसम्बन्धिदोषरहिता, कृत्रिमा भाषा[३], व्याकरणसूत्रैः शोधिता भाषा "संस्कृतम्"

१ ऐतरेय ब्राह्मण- "इति वै दैवम् तथेति मानुषम् .... ।

२ ऐतरेय आरण्यकम्- आर्यवाचाः .... ।

३ युक्तेऽतिसंस्कृतेऽमर्षिण्यभिनीतोऽथ संस्कृतम्,
कृत्रिमे लक्ष्णोपेतेऽप्यनन्तोऽनवधावपि ॥ (यजनाध्यापने नित्यं क्रियेते संस्कृतात्मनाम् :वाज्ञाज्ञज्ञ)

* शिक्षणसहायकः, संस्कृतकेन्द्रीयविभागः, त्रिभुवनविश्वविद्यालयः, कीर्तिपुरम्

CC-0. Nepal Sanskrit Academy, Kathmandu

इति वैयाकरणैः नाम प्रदतमस्ति। इयं पदवाक्यसंस्कारेण संस्कृताभाषा इति हेतोः 'संस्कृतम्, संस्कृतम्' इति अन्वर्थतां प्राप्नोति। स्वयम् आत्मानं संस्कृतं कर्तुं प्रतिदिनम् अध्ययनाध्यापनं यजनं च क्रियन्ते।[४] ज्ञायतेऽत्र विशेष्य–विशेषणरूपेण संस्कृतम्। अत्र संस्कृतवाक्शक्तिः स्वविषये स्वयं स्वस्य महिमानं निगदति, प्रकाशयति, उद्घोषयति, अभिव्यक्तीकरोति, वदति च–

अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुतमानुषेभिः।
यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम्॥[५]

इह नु महिमानुसारं संस्कृतस्य प्रायोगिकानि एतानि क्षेत्राणि सन्ति– योग–दर्शन–मनोविज्ञान–संगीत–नृत्य–नाटक–काव्यशास्त्र–व्याकरण–गणित–ज्यौतिष–आयुर्वेद–रसायन–वास्तुशास्त्र–अभिलेख–शिक्षा–राजनीति–युद्धनीतीत्यादीनि। एतानि क्षेत्राण्याश्रित्य अद्यत्वे योरोप–अमेरिकादिषु क्षेत्रेषु संस्कृतस्य अध्ययनाध्यापनस्य क्रमिकरूपेण विकासः भवति। वैदेशिकविचारकाः संस्कृतवाङ्मयस्य ऋणिनः सन्ति।[६]

सर्वेषां कृते एकमेव गम्यं संस्कृतमिति। यथा सर्वाः नद्यः एकमेव समुद्रं प्रति गच्छन्ति। वस्तुतः वैदिकवाङ्मयेऽपि ब्रह्मविषये अध्यात्मविषये च रहस्यात्मकं कूटात्मकञ्च वर्णनं बालाद्याः कथाः च प्राचुर्येण समुपलभ्यन्ते–ऋग्वेदे, यजुर्वेदे, अथर्ववेदे एतेरेय–कौषितकितैत्तिरीय–शतपथ–ब्राह्मणग्रन्थेषु बृहदारण्यकोपनिषदि आपस्तम्ब–आश्वलायन–कात्यायन–लाट्यायन–सांख्यायन–वैतानसूत्रेषु च परं रहस्यात्मकः कूटात्मकोपदेशः समुद्घोषितः प्राप्यते। तत्र लौकिकवाङ्मये रामायण–महाभारत–पुराणादिषु अपि च बौद्ध जैनादिषु साहित्येषु उपदेशात्मकानि वचनानि समुद्घोषितानि च सन्ति।

संस्कृतवाङ्मये उदात्तमनोविज्ञानं पूर्णरूपेण संतुलितं कठोपनिषदि असंम्भवं किमपि नास्ति तन्मनसा शिवसंकल्पेन प्राप्तुं शक्यते। उपनिषद् उद्घोषयति– "मनसैवेदमाप्तव्यं नेहानानास्ति किञ्चन" इति। इह संसारे मनसः ऋते किमपि कार्यं नैव क्रियते। मनः एव सर्वेषां कार्याणां सर्वेषां गतिविधीनां कारकत्वेन विद्यते–

---

४ "संस्कृतश्चापि रामेण जगाम गतिमुत्तमाम्" वाल्मीकिरामायणम् ४.५७.११

५ ऋ.१०|१२५|५

६ the intellectual debt of Europe to Sanskrit literature has been undesirably great and many perhaps become greater still in the years that are to come... — Macdonell

CC-0. Nepal Sanskrit Academy, Kathmandu

मन एवं मनुष्याणां कारणं बन्धमोक्षयोः ।[७]

एतत् मनः शिवसंकल्पमस्तु इति भूयोभूयः प्रार्थनाः सन्ति– "यत्प्रज्ञानमुतचेतो धृतिश्चज्ज्योतिरन्तर मृतं प्रजासु यस्मान्नऋते किञ्चन कर्मक्रियते तन्मे मनः शिवसङ्कल्पमस्तु ।" मनसा निश्चयं कृत्वैव कार्ये प्रवृतः भवति मानवः एषा प्रक्रिया खलु एवम् अस्ति यत् प्रप्रथमं–आत्मा बुद्धया समेत्यर्थान्मनो युङ्क्ते विवक्षया । मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् । मारुतस्तुरसि चरन् मान्द्रं जनयते स्वरम् ।[८]

"मनसा निश्चयं कृत्वा ततो वाचाभिधीयते। क्रियते कर्मणा पश्चात् प्रमाणं मे मनस्ततः ॥" अस्याधारेण अत्र सावित्र्या दृढनिश्चयं सतीत्वं पातिव्रात्यं निर्धार्यते वनपर्वणि महाभारते– 'दीर्घायुरथवाल्पायुः सगुणो निर्गुणोऽपि वा ।' यत् मम पतिः दीर्घायुः स्मात् अथवा अल्पायुः स्यात् गुणी स्यादथवा गुणरहितो स्यात् एकवारं मया पतिः स्वीकृतः । अतः स एव मम भर्ता भवतु इति–

सकृद्वृतो मया भर्ता न द्वितीयं वृणोम्यहम् ।[९]

संस्कृतस्य संस्कृतवाङ्मयस्य महाभारतस्य वा, विषये महती एषा एका एव गर्वोक्तिः "यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्" इति समुद्घोषिता वर्तते । समग्रेऽपि विश्वे याः गति–विधयः व्यवहाराः विद्यमानाः सन्ति । तानि सर्वाणि इह संस्कृतवाङ्मये संस्कृतभाषासन्दर्भे संस्कृतसन्दर्भे संस्कृतविषयवस्तुसन्दर्भे तथैव चापि । ये गतिविधयः, क्रियाकलापाः अत्र नैव सन्ति, ते व्यवहाराः अन्यत्र कुत्रापि नैव प्राप्यन्ते। कथनस्याशयः सर्वं खलु अत्रैव संस्कृते अस्ति। आहोस्वित् वक्तव्यमेतत् संस्कृतवाङ्मयस्य स्वाभिमानम् अभिव्यज्यते यत् अन्यस्थलेषु अन्येषु साहित्येषु अन्यवाङ्मयेषु इतरभाषासु च नैवानुभूयते । एतस्य तथ्यस्य मुख्यं वैशिष्यं नु उत्कृष्टं चिन्तनम् उदात्तचिन्तनम् उदारविचारं विचारितं पं.नारायणेन हितोपदेशे– "अयं निजः परो वेति गणना लघुचेतसाम् । उदारचरितानां तु वसुधैव कुटुम्बकम् ॥" संस्कृतवाङ्मये नीतिशास्त्रस्य नैतिकमूल्यस्य महन्महत्त्वं वर्तते। नीतिशास्त्रस्यास्य अध्ययनस्य परं वैभवमत्र यत् इन्द्रात् अपि पराजयं कदापि नैव प्राप्नोति यः प्रतिदिनं नीतिशास्त्रस्य स्वाध्यायं श्रवणं चिन्तनं मननं च करोति।

"अधीते य इदं नित्यं नीतिशास्त्रं शृणोति च। न पराभवमाप्नोति शक्रादपि कदाचन।" इत्यादिवचनानि 'नीतिज्ञः सर्वोपरि भवति' इति प्रमाणीकुर्वन्ति। सम्पूर्णसंस्कृतवाङ्मयं नीतिवचनैर्नीतिकथाभिरुदाहरणैः च नीतिशास्त्रम् ओतप्रोतमस्ति । नीतिसम्राड् आचार्यचाणक्यः सकलं जगत् स्ववशे कर्तव्यम् इति

७ योगवासिष्ठ।

८ निरुक्तम्।

९ वनपर्व, ९४५/२७

CC-0. Nepal Sanskrit Academy, Kathmandu

निगदति यत् क्षमया, दयया प्रेमद्वारा, सत्येन, सरलभावेन, सेवया विनयपूर्वकेन च । एतैर्गुणैः खलु समग्रं संसारं स्वप्रभावेण प्रभावयति गुणिनो जनाः – "क्षमया दयया प्रेम्णा सुनृतेनार्जवेन च । वशीकुर्याज्जगत्सर्वं विनयेन च सेवया ॥" पुनःच सत्येनावाप्यत परम् इत सर्वोच्चपदं प्राप्तुं शक्यते– "सत्यं माता, पिता ज्ञानं धर्मो भ्राता दया सखा । शान्तिः पत्नी क्षमा पुत्रः षडेते मम बान्धवाः ॥" संस्कृतवाङ्मयं पदे पदे प्रतीकरूपेण शिक्षयति । चाणक्यनीतिः ज्ञापयति– 'मातुः प्रतीकं सत्यम्, पितुः प्रतीकं ज्ञानम्, भ्रातुः प्रतीकं धर्मः, सख्युः प्रतीकं दया, पत्न्याः प्रतीकं शान्तिः, पुत्रस्य प्रतीकं क्षमा' इति । एतत् संस्कृतपरिवारस्य स्वरूपं प्रकाशयति । संस्कृतस्य ये खलु सत्यज्ञानादयः बान्धवाः संस्कृत-शिक्षणस्य मुख्योदेशाः सन्ति । पृथिवी माता मातृभूमेः परिचयं संस्कृतमेवं कारयति । माता भूमिः पुत्रोऽहं पृथिव्याः । जननी मातृभूमिश्च स्वर्गात् अपि उत्कृष्टे स्तः । मातृसेवनं मातृभूमेः सेवनं च जीवनसाफल्याय भवतः ।

विश्वस्य सर्वासां भाषाणाम् अविर्भावः केवलं बुद्धिविकासाय अभूत्, किन्तु संस्कृतस्य विभिन्नानां शास्त्राणां शासनं शरीरवाणीबुद्धिमन-आत्मादेवतापर्यन्तं प्राप्तदोषाणां निवारणार्थम् अभूत् । यत्र वायोरपि प्रवेशो नास्ति, यत्र सूर्यरश्मयोऽपि नैव गच्छन्ति तत्र बुद्धिमतां बुद्धिः शीघ्रं प्रविशति । अतः संसारेऽस्मिन् बुद्धिमतां बुद्धेरगम्यं वस्तु किमपि नास्ति–

"न यत्रास्ति गतिर्वायो रश्मीनां च विवस्वतः ।
तत्रापि प्रविशत्याशु बुद्धिबुर्द्धिमतां सदा ॥[१०]
मनो विशुद्धां बुद्धिं दैवमाहुव्रतं द्विजाः ।[११]

तत् सद्बुद्धिद्वारा सत्कर्मप्रवृत्तिं शिक्षयति संस्कृतभाषा– "कर्मणा जायते सर्वं कर्मैव गतिसाधनम् ।" अतः सर्वविधप्रयत्नैः साधुकर्माणि कर्तुम् समुद्घोषणा संस्कृतवाचः परिलक्ष्यते–

तस्मात् सर्वप्रयत्नेन साधुः कर्म समाचरेत् ॥[१२]

पुरातनं सर्वं साधुरेव नैव भवति नापि नवीनं सर्वदा साधु भवति । यत् किमपि अस्ति, तस्य पूर्णतः परीक्षणं कृत्वैव बुद्धिमन्तः अग्रे गच्छन्ति किन्तु मुर्खा जना अन्धानुकरणमेव कुर्वन्ति ।[१३]

संस्कृतस्य पक्षद्वयमस्ति भाषा, वाङ्मयञ्च । भाषाया महत्ता वाङ्मयस्य चोपयोगिता संसारेऽस्मिन् मुख्ये तत्त्वे स्तः । एतस्य सर्वस्य संस्कृतवाङ्मयस्य मुख्यम् उद्देश्यम् आत्मज्ञानमेव । "आत्मानं

[१०] पञ्चतन्त्रम् ।

[११] उपनिषद् ।

[१२] विष्णुपुराणम्

[१३] पुराणमित्येव न साधु सर्वं, न चापि काव्यं नवमित्यवद्यम् । सन्तः परीक्ष्यान्तरं भजन्ते मूढः परप्रत्ययने यबुद्धिः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

विद्धि", "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो निदिध्यासितव्यश्च" इति सर्वत्र संस्कृतवाङ्मये एतादृशाः समुद्घोषणा वर्तन्ते । एतस्याक्षरसमाम्नायस्य ज्ञानस्य प्रतिफलं यत् यः कोऽपि अस्य अक्षरसमाम्नायस्य अध्ययनं श्रवणं मननं निदिध्यासनं च करोति तस्य मातापितरौ स्वर्गे लोके महिमामण्डितौ भवत इति–"सोऽयमक्षरसमाम्नायो वाक्समाम्नायः पुष्पितः फलितश्च चन्द्रतारकवत् प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः। सर्ववेदफलावाप्तिश्चास्य ज्ञाने भवति। मातापितरौ चास्य स्वर्गे लोके महीयेते।"[१४] अन्यभाषाणाम् अपेक्षया संस्कृतभाषा श्रवणसमये मस्तिष्ककोषा अत्यधिकाः क्रियाशीला भवन्ति उदात्तानुदात्तस्वरितमन्त्रोच्चारणावसरे सद्यो मानसिकशान्तिः स्वास्थ्यञ्च अनुभूयेते ।

निष्कर्षः

संस्कृतस्य समसामयिकानां सङ्गणक–विज्ञान–स्वास्थ्य–नैतिकता–संस्कृति–कला–सङ्गीत–योग–वास्तु–खगोल–इतिहास–तन्त्रज्ञान–प्रबन्धन–प्रशासन–दर्शन–अर्थशास्त्रादीनां विषयाणां च यः सम्बन्धः वर्तते, एतस्य सम्बन्धस्य उपयोगिता उदाहरणद्वारा व्यवहारद्वारा अनुसन्धानेन क्रियान्वयेन च प्रदर्शनीया भवन्ति। संस्कृते नवाचार–कालानुसारितादीनाम् अनुपालने च मूलस्वरूपस्य भञ्जनं नैव भवति ।

सन्दर्भग्रन्थाः

१. संस्कृतचन्द्रिका — दिल्ली संस्कृत अकादमी, दण्डेवालान, करोलवाग, दिल्ली ।
२. संस्कृतविमर्शः — राष्ट्रिय–संस्कृत–संस्थानम्, जनकपुरी, दिल्ली ।
३. सप्तदशी — चमूकृष्ण शास्त्री, संस्कृतभारती, दिल्ली ।
४. The Wonder that is संस्कृत, सम्पद् विजयश्च, अरविन्दाश्रम, पाण्डिचेरी ।
५. प्रौढरचनानुवादकौमुदी — डा.कपिलदेव द्विवेदी, विश्वविद्यालय प्रकाशन, वाराणसी, भारत ।
६. संस्कृतशिक्षणसमीक्षण — डा. इन्दिराचरण पाण्डेय, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी ।
७. History of Sanskrit Literature — Mac Donell, मोतीलाल वनारसीदास, भारत ।
८. पञ्चतन्त्र — आचार्य विष्णु शर्मा, मोतीलाल वनारसीदास, दिल्ली ।
९. चाणक्यनीतिः — आचार्य चाणक्य, मोतीलाल वनारसीदास, दिल्ली ।
१०. स्कन्दपुराणम् — गीताप्रेस, गोरखपुर, उत्तरप्रदेश ।

[१४] महाभाष्यम्, आह्निक २

CC-0. Nepal Sanskrit Academy, Kathmandu

नेपालीनिवहः

रहेछ संसार निशासमान,
आएन ज्युँदै रहँदा नि ज्ञान।
आखीर श्रीकृष्ण रहेछ एक,
न भक्ति भो ज्ञान न भो विवेक॥

–महाकवि देवकोटा

CC-0. Nepal Sanskrit Academy, Kathmandu

बौद्ध माध्यमिक दर्शन र यसका शाखाहरू

✍ प्रा.डा. काशीनाथ न्यौपाने*

शोधसार

मध्यम मार्गमा अवलम्बित भएर जुन बौद्धहरू प्रवृत्त भए ती माध्यमिक हुन् । त्यसैले नै माध्यमिकवृत्तिमा "भावाभावद्वयरहितत्वात् सर्वभावानुत्पत्तिलक्षणा शून्यता तदाश्रितो मार्गो मध्यमः" भनिएको छ अर्थात् भाव र अभाव यी दुबैबाट रहित हुनाले सम्पूर्ण स्वभावहरूलाई उत्पत्ति गर्ने लक्षण भएको शून्यतासँग आश्रित मार्ग नै मध्यम मार्ग हो । त्यसैगरी तत्त्वहरूको विवेचन गर्ने क्रममा शाश्वतवाद र उच्छेदवाद दुबैलाई प्रहाण गर्ने उद्देश्यले मध्यममार्गको प्रतिस्थापन गरेका हुन् आचार्यहरूले । तार्किक बौद्ध विद्वान्हरूको विलक्षण शैलीबाट प्रतिपादित शून्यताप्रतिस्थापक सिद्धान्तहरूको विवेचन गर्नाले नै माध्यमिकहरू शून्यवादीका रूपमा प्रसिद्ध भएका हुन् । सत्त्व (सत्ता) र असत्त्व (असत्ता) यी दुईका बीचमा रहनु वा यिनका मध्यमा स्थित हुनु भन्ने अर्थमा माध्यमिक शब्दको प्रयोग गरिन्छ । अर्थात् सम्पूर्ण पदार्थहरू परमार्थतः सत् होइनन् र संवृतितः असत् पनि होइनन् भन्ने जसको दृष्टिकोण रहेको हुन्छ ती माध्यमिक हुन् ।

माध्यमिक मतका दुईवटा विभागहरू रहेका छन् । ती हुन् – स्वातान्त्रिक माध्यमिक र प्रासंगिक माध्यमिक । व्यावहारिक सत्ताको स्थापनामा मतभेदका कारण स्वातन्त्रिक माध्यमिक मतका पनि दुईवटा भेद रहेका छन्– क. सूत्राचार स्वातन्त्रिक माध्यमिक एवं ख. योगाचार स्वातन्त्रिक माध्यमिक ।

शब्दकुञ्ची

भावविवेक, संवृति, दोषापत्ति, कल्पनानुलोमिक, प्रपञ्चातीत, सूत्राचार, योगाचार, प्रतिभासित, मध्यमकशास्त्र, स्वलक्षणसत्ता, वस्तुसत्तान्वेषिणी बुद्धि, विज्ञप्तिमात्रता, स्वसंवेदन, परिनिष्पन्नलक्षण, चक्षुर्विज्ञान ।

विषयप्रवेश

आचार्य नागार्जुनले प्रतीत्यसमुत्पाद नै शून्यता हो र त्यो शून्यताको ज्ञान नै मध्यम मार्ग हो भनेका

* निर्देशक, अनुसन्धान केन्द्र, नेपाल संस्कृत विश्वविद्यालय

CC-0. Nepal Sanskrit Academy, Kathmandu

छन्।[1] आचार्य नागार्जुनले ग्रन्थहरूको प्रणयन गर्नुभन्दा पूर्व नै मध्यममार्ग वा शून्यतावादी चिन्तनको धरातल तयार थियो। त्यो बुद्धवचनहरूमा प्रष्ट रूपमा देख्न पाइन्छ तर नागार्जुनका कृतिहरूमा शून्यवादले पूर्णतः विकसित हुने र एउटा दर्शन–प्रस्थानका रूपमा स्थापित हुने मौका प्राप्त गर्‍यो। त्यही माध्यमिक मत वा शून्यवादी विचार केही पछि गएर दुई भागमा बाँडिन पुग्यो। स्वतन्त्र रूपमा तर्क प्रस्तुत गर्ने र प्रसङ्कको प्रयोग गर्नेहरूका बीचमा मतभेद हुनपुग्यो। यसरी माध्यमिक मतका दुईवटा शाखाहरू हुन पुगे। ती दुवै शाखाका विचारहरू तथा प्रमुख आचार्यहरूको परिचय यहाँ प्रस्तुत गरिन्छ।

माध्यमिक मतका शाखाहरू

सर्वप्रथम माध्यमिक मतका कुनै शाखाहरू थिएनन्। नागार्जुनको मध्यमकशास्त्रको रचनाभन्दा पछि यसका टीकाहरूको रचना भएपछि यसका शाखाहरूको प्रारम्भ भएको हो। त्यसैले माध्यमिकका शाखाहरूको विकास हुनुभन्दा पहिलेका माध्यमिकलाई बौद्धभन्दा इतरका दार्शनिकहरूले मुख्य–माध्यमिक भन्ने गर्दछन्। माध्यमिक मतका दुईवट विभागहरू रहेका छन्। ती हुन् – स्वातान्त्रिक माध्यमिक र प्रासंगिक माध्यमिक । संस्कृतका मूलग्रन्थहरूमा यी सिद्धान्तहरूको एवं वाद–विवादहरूको चर्चा गरिएको भएता पनि स्वातन्त्रिक र प्रासंगिक नामकरण भने पाइन्न। तिब्बती विद्वान्हरूले यो नामकरण गरेका हुन्।[२]

स्वातन्त्रिक माध्यमिक शाखा

आचार्य भावविवेक अथवा भव्यले माध्यमिकहरूको स्वातन्त्रिक शाखाको स्थापना गरेका हुन्। उनले माध्यमिककारिकाको प्रज्ञाप्रदीप नामक व्याख्या लेखेका छन्। माध्यमिक हृदयकारिका नामक एउटा स्वतन्त्र ग्रन्थ पनि लेखे साथै त्यसमा तर्कज्वालानामक टीकासमेतको रचना गरे। करतलरत्न, मध्यमकार्यसंग्रह, मध्यमकावतारप्रदीपक र मध्यमकप्रतीत्यसमुत्पाद समेत उनका रचनाहरू हुन्।

भावविवेकले शून्यवादको समर्थनमा स्वतन्त्र अनुमान उद्‌भावित गरेका छन्। ती स्वतन्त्र अनुमानहरूमा पक्षलाई परमार्थतः भन्ने विशेषणद्वारा विशिष्ट गरिएको छ। हेतुमा विपक्षव्यावृत्ति हुँदैन, तथा हेतु अनुमितिप्रसज्यप्रतिषेधात्मक हुन्छ। भव्यले त्यसको उदाहरण यसरी प्रस्तुत गरेका छन् परमार्थतः आध्यात्मिक आयतन स्वतः उत्पन्न हुँदैन, किनकि ती विद्यमान हुन्छन् जस्तै चैतन्य। यहाँ परमार्थतः विशेषण दिनुको अर्थ चक्षु आदि आयतनहरूको सांवृत उत्पाद प्रतिषेध्य

[1] यः प्रतीत्यसमुत्पादः शून्यतां तां प्रचक्ष्महे। सा प्रज्ञप्तिरूपादाय प्रतिपत्सैव मध्यमा॥
नागार्जुन, मध्यमकशास्त्रम्, द्वारिकादास शास्त्री (सं.), वाराणसी : बौद्ध भारती, १९८३, पृ. १६।

[२] रामशंकर त्रिपाठी, बौद्धदर्शन प्रस्थान, वाराणसी : केन्द्रीय उच्च तिब्बती शिक्षा संस्थान, १९९७, पृ. १९१।

CC-0. Nepal Sanskrit Academy, Kathmandu

छैन भन्ने हो। स्वतः उत्पादको निषेध गर्नाले परत उत्पाद अभीप्सित नहुने हुनाले यहाँ प्रसज्य प्रतिषेध अङ्गीकार्य हुन्छ, पर्यूदास प्रतिषेध होइन।

स्वतन्त्रानुमानको समर्थनका साथ भव्यले प्रसंगानुमानको निराकरण गरेका छन्। उनले बुद्धपालितको खण्डन यसै सन्दर्भमा गरेका छन्। भावविवेकका मत अनुसार प्रसंगानुमानमा हेतु र दृष्टान्तको अभाव हुन्छ, उपरोक्त दोषको परिहार पनि हुँदैन तथा प्रसंगवाक्यलाई उल्ट्याएर विपरीत अर्थ सिद्ध गर्न सकिन्छ। उदाहरणका लागि बुद्धपालितले यसको उपस्थापन गरेका छन् – पदार्थ स्वतः उत्पन्न हुँदैनन् किनकि तिनको उत्पत्ति व्यर्थ हुन्छ र उत्पत्ति कहिल्यै निवृत्त हुँदैन। यस भनाईलाई यस प्रकार उल्टो बनाउन सकिन्छ पदार्थ परतः उत्पन्न हुन् किनकि तिनिहरूको उत्पत्ति र निरोध सावकाश हुन्छ। यहाँ स्मरणीय कुरा के छ भने नैयायिकहरूका मतानुसार पनि प्रसंगलाई हेतुको अभावमा अनुमान मान्न सकिंदैन। अनुमानबाट बहिष्कृत हुनाले प्रसंगको कुनै पनि प्रमाणमा अन्तर्भाव हुन सक्दैन।[३]

भाव विवेकको स्वतन्त्र अनुमानको आधार प्रसंगमा दोषपत्ति हुँदैन तर परमार्थ एवं संवृतिका विषयमा मतपरिष्कार भने छ। उनका अनुसार परमार्थ पनि दुई किसिमको छ र संवृत्ति पनि दुई किसिमको नै छ। एकातिर अपर्याय परमार्थ छ र अर्कातिर पर्याय परमार्थ छ। अपर्याय परमार्थ अनभिसंस्कार, लोकोत्तर, अनास्रव एवं अप्रपञ्च हुन्छ। पर्याय परमार्थ भने साभिसंस्कार, तथा प्रपञ्चानुगत हुन्छ। यही नै कल्पनानुलोमिक परमार्थज्ञान हो। संवृत्तिमा पनि तथ्यसंवृत्ति तथा मिथ्यासंवृत्ति यी दुईवटा विभागहरू छन्। परमार्थमा आश्रित देशना तथ्यसंवृत्ति हो। तथ्यसंवृत्ति परमार्थको शब्द र तर्कका स्तरमा अभिव्यक्त हुन्छ। परमार्थ र संवृत्तिका यी अवान्तर भेदहरूको कल्पनाद्वारा भावविवेकले तिनिहरूका विचको खण्डन पुर्ने प्रयत्न गरेका छन्। तथ्यसंवृत्ति र पर्यायपरमार्थले प्रतीयमान मिथ्या जगत्‌बाट प्रपञ्चातीत अनिर्वाच्य सत्यसम्म जानका लागि पुल वा सेतुको काम गर्दछन्। अपर्याय परमार्थ तथा पर्याय परमार्थको तुलना वेदान्तको निरूपाधिक एवं सोपाधिक ब्रह्मसंग गर्न सकिन्छ। वेदान्तमा पनि माया र संवृत्तिलाई दुई भेद गरिएको छ – विद्या र अविद्या। वास्तवमा मिथ्याबाट सत्यमा पुग्नका लागि ज्ञान मध्यस्थका रूपमा रहेको हुन्छ। अन्यथा परमार्थ निरर्थक शब्दमात्र रहन्छ। ज्ञानका पनि दुइवटा भेदहरू मान्नु पर्दछ। ती हुन्— परोक्ष तथा अपरोक्ष। असत्यमा ग्रस्त लोकको परोक्षज्ञानतिरको प्रवृत्ति उपदेशमूलक परोक्षज्ञान विना हुन सक्दैन। त्यो परोक्ष ज्ञान नै अपरोक्ष ज्ञानको आकर्षणको सूत्र बन्दछ। अपरोक्ष ज्ञान नै परमार्थलाई साक्षात्कार गर्ने द्वार हो।

यसरी भावविवेकले स्वतन्त्र ढंगबाट आ ना तर्कहरूद्वारा समग्र मतहरूको खण्डनपूर्वक आ नो

३ जी.सी. पाण्डे, बौद्ध धर्म के विकास का इतिहास, लखनऊ : हिन्दी समिति, १९७६, पृ. ३९५–९६।

CC-0. Nepal Sanskrit Academy, Kathmandu

पक्ष प्रस्तुत गरी स्वातन्त्रिक माध्यमिक मतको स्थापना गरेका थिए।[४]

व्यावहारिक सत्ताको स्थापनामा मतभेदका कारण स्वातन्त्रिक माध्यमिक मतका पनि दुईवटा भेद रहेका छन्– क. सूत्राचार स्वातन्त्रिक माध्यमिक एवं ख. योगाचार स्वतन्त्रिक माध्यमिक।

सूत्राचार स्वातन्त्रिक माध्यमिक

यिनीहरू व्यवहारको स्थापना प्रायः सौत्रान्त्रिक दर्शनको ढंगबाट गर्दछन्। त्यसो हुनाले यिनलाई सौत्रान्तिक स्वातन्त्रिक माध्यमिक पनि भनिन्छ। अर्थात् अठारवटा धातुहरूमा संगृहीत धर्महरूको स्थापना व्यवहारमा यिनीहरूले सौत्रान्तिकसम्मत गरेका हुनाले यिनीहरूलाई उक्त दोस्रो नामाकरण गरिएको हो। आचार्य भावविवेक वा भव्य एवं ज्ञानगर्भ आदि यस मतका प्रमुख आचार्यहरू हुन्।

यस मतका अनुसार व्यवहारमा बाह्यार्थको सत्ता मान्य छ। इन्द्रियजन्य ज्ञान मिथ्याकार हुँदैन, सत्याकार हुन्छ। ज्ञानले आ नो विषयको आकार ग्रहण गर्दै विषयहरूको ग्रहण गर्दछ। पूर्वापरकालिक कार्यकारणभावलाई मान्दछन् समकालिक मान्दैनन्। अर्थात् कारण र कार्यको एउटै समयमा (युगपत्) समवस्थान हुँदैन। दशभूमिकसूत्रमा भनिएको छ –

चित्तमात्रं भो जिनपुत्र यदुत त्रैधातुकम् अर्थात् हे बोधिसत्त्वहरू यी तीनवटै अर्थात् काम, रूप र अरूपधातुहरू चित्तमात्र हुन्। यस वचनले बाह्यार्थको निषेध हुन्छ भन्ने कुरा उनिहरू मान्दैनन्। उनिहरूका अनुसार यस वचनले चित्तभन्दा अतिरिक्त कुनै ईश्वर, महेश्वर आदि यस लोकको कर्ता हुन्छ भन्ने तैर्थिक मतको खण्डन गर्दछ। लंकावतार सूत्रमा भनिएको छ–

दृश्यं न विद्यते बाह्यं चित्तं चित्रं हि दृश्यते।
देहभोगप्रतिष्ठानं चित्तमात्रं वदाम्यहम्॥[५]

अर्थात् बाह्य दृश्य (अर्थ) विद्यमान हुँदैन, चित्त नै विभिन्न आकारहरूमा देखिएको हो। देह, भोग, भजन आदि सम्पूर्ण कुराहरू चित्तमात्र हुन्– म यस्तो भन्दछु।

यस वचनको अभिप्राय पनि बाह्यार्थको निषेध नभएर बाह्यार्थहरूको सत्ता परमार्थतः हुँदैन भन्नेमात्र हो। त्यसका अतिरिक्त जति पनि सूत्रवचनहरूले विज्ञप्तिमात्रताको प्रतिपादन गरेको भनी भनिन्छ वा दृष्टिगोचर हुन्छ ती सबैको अर्थ त्यस प्रकारले बुझ्नु हुन्न भन्ने धारणा भावविवेकको रहेको छ। अथवा कुनै पनि सूत्रको प्रतिपाद्य अर्थ विज्ञप्तिमात्रता होइन भन्ने उनको धारणा हो।

---

[४] ऐजन, पृ. ३९७।

[५] काशीनाथ न्यौपाने, (नेपाली अनु.), लंकावतारसूत्रम्, काठमाण्डौ : जयतु संस्कृतम्, २०६८ (वि.सं.), पृ. ६७।

CC-0. Nepal Sanskrit Academy, Kathmandu

व्यवहारतः बाह्यार्थको सत्ता हुन्छ । द्विचन्द्राभास आदि भ्रान्तज्ञान पनि एउटा चन्द्र विना हुन सक्दैन अर्थात् द्विचन्द्रज्ञानको उत्पत्तिका लागि पनि एकचन्द्रको आलम्बन आवश्यक हुन्छ । यदि एउटा चन्द्रमाको पनि अस्तित्वलाई स्वीकार नगर्ने हो भने द्विचन्द्रज्ञान उत्पन्न हुन सक्दैन । यदि एकचन्द्र बाहिर न हुने हो भने केवल वासनामात्रले द्विचन्द्रज्ञान उत्पन्न हुँदैन । जस्तै औंसीको रातमा द्विचन्द्रज्ञान उत्पन्न हुँदैन । अतः ज्ञान बाह्यार्थको आलम्बन विना उत्पन्न हुन सक्दैन । त्यसैगरी बाह्यार्थलाई नमान्ने हो भने सूत्रविरोधको दोष पनि उत्पन्न हुन्छ । **सञ्चितालम्बनाः पञ्चविज्ञानकायाः** अर्थात् इन्द्रियविज्ञान संचित आलम्बनबाट उत्पन्न हुन्छन् भन्ने सूत्रको विरोध हुने हुनाले पनि व्यवहारतः बाह्यार्थलाई स्वीकार गर्नुपर्दछ ।[६]

बाह्यार्थको सत्तालाई मान्ने भएकोले नै आचार्य भावविवेकले आलयविज्ञानको सत्तालाई मान्दैनन् । यदि आलयविज्ञानलाई मान्ने हो भने बाह्यार्थ नहुँदा पनि आलयविज्ञानमा स्थित बाह्यार्थवासनाहरूबाट नै बाह्यार्थको अवभास हुने विज्ञप्तिहरू उत्पन्न हुन्छन् अतः तिनिहरूलाई प्रयत्नपूर्वक बाह्यार्थ सिद्ध गर्नका लागि प्रयास नै गर्नु पर्दैन । विज्ञानवादीहरूले आलयविज्ञानका नामद्वारा वस्तुतः आत्माको नै स्थापना गरेका छन्, दुबैमा केवल नाममात्रको अन्तर रहेको छ । विज्ञानवादीहरू र आत्मवादी तीर्थंकरहरूमा कुनै भेद छैन । भावविवेक आलयविज्ञानलाई मान्दैनन् त्यसैले क्लिष्टमनोविज्ञानलाई पनि उनले मान्नुपर्ने आवश्यकता रहँदैन । उनी चक्षुर्विज्ञानसम्मका छवटा विज्ञानहरूलाई मात्र मान्दछन् ।[७] ती हुन्– चक्षुर्विज्ञान, श्रोत्रविज्ञान, घ्राणविज्ञान, जिह्वाविज्ञान, कायविज्ञान र मनोविज्ञान ।

भावविवेकले स्वसंवेदनलाई पनि अस्वीकार गरेका छन् । ज्ञानद्वारा स्वयं आफू (ज्ञान) लाई नै आलम्बन बनाइन्छ भन्नु सर्वथा व्यवहारतः पनि अयुक्त हुन्छ । ज्ञान जति नै अभिव्यक्त भए तापनि त्यसले आफूलाई प्रकाशित गर्न सक्दैन । जस्तै – नर्तक जतिसुकै शिक्षित भए तापनि आ ना काँधमा आरुढ हुन सक्दैन । यसरी स्वसंवेदनलाई भावविवेकले अयुक्त निश्चित गरेका छन् ।

विज्ञानवादीहरूका मत अनुसार प्रज्ञापारमितासूत्रहरूमा प्रतिपादित सर्वधर्मनिःस्वभावताको तात्पर्य यसरी प्रस्तुत गर्न सकिन्छ – परिकल्पितलक्षण लक्षणनिःस्वभाव हुन्छन्, परतन्त्रलक्षण उत्पत्तिनिःस्वभाव हुन्छन् र परिनिष्पन्नलक्षण परमार्थनिःस्वभाव हुन्छन् ।

भावविवेक विज्ञानवादीहरूलाई सोद्धछन् – त्यस परिकल्पित लक्षणको स्वरूप कस्तो छ जुन लक्षणनिःस्वभाव हुने हुनाले निःस्वभाव मानिन्छ । यदि रूप आदि विषयक शब्द एवं

६ त्रिपाठी, ऐजन, पा.टि.नं. २, पृ. १९३ ।

७ ऐजन ।

CC-0. Nepal Sanskrit Academy, Kathmandu

कल्पनाबुद्धिसंग यसको तात्पर्य हो भने त्यो मशान अपवाद वा अपव्याख्या हुन्छ किनकि शब्द र कल्पनाबुद्धि पञ्चस्कन्धमा संग्रहित हुन्छन्। उदाहरणका लागि रज्जुमा सर्पबुद्धिद्वारा आरोपित अर्थ (सर्प) को सत्ता नहुने भएता पनि सर्पबुद्धिको अर्थ सर्पको सत्ता चाहिँ हुन्छ नै किनकि सर्पको सत्ता हुन्छ र त्यस्तै रूपलाई वेदना मान्ने बुद्धिको अर्थ हुँदैन तर रूपलाई रूप नै मान्ने बुद्धिको विषय त हुन्छ।

